इम उ त्वा वि चक्षते (२) इत्यृचः त्रिशोक ऋषिः। साम्नः [पौषस्य] पूषा [ऋषिः।] मरुतो देवता ॥ (आ. गे. २२७) ॥ १३६ ॥

3. B My L. °धवम् for °धवं

20. B My L. इमा for इम

समस्य मन्यवे विशः (३) इत्यृचः वत्स ऋषिः। साम्नः मरुतां संवेशीयस्य मरुतः॥ (आ. गे. २२८)॥ १३७॥

देवानामिद्वो महत् (४) इत्यृचः कुसीदी काण्वः ऋषिः। साम्नां चतुर्णामाद्ययोर्हविष्मान् परयोर्हविष्कृत्। विश्वेदेवा देवता॥ (आ. गे. २२९-२३२)॥ १३८॥

सोमानां स्वरण (५) इत्यृचः मेधातिथिः ऋषिः। साम्नः कक्षीवान् औशिज ऋषिः ब्रह्मणस्पतिर्देवता॥ (आ. गे. २३३)॥ १३९॥

बोधन्मना (६) इत्यृचः श्रुतकक्ष ऋषिः। साम्न औषसस्य उषा ऋषिः॥ (आ. गे. २३४)॥ १४०॥

अद्या नो देव सवितः (७) इत्यृचः श्यावाश्वः ऋषिः। सविता देवता। साम्नोः भरद्वाजस्य मौक्षयोर्भरद्वाज ऋषिः॥ (आ. गे. २३५-६)॥ १४१॥

कस्य वृषभ (८) इत्यृचः प्रगाथः काण्व ऋषिः। साम्नां भारद्वाजानां त्रयाणां भरद्वाजः [ऋषिः]॥ (आ. गे. २३७-९)॥ १४२॥

उपह्वरे गिरीणाम् (९) इत्यृचः वत्सः ऋषिः। साम्नो शाकल्यसाम्नोः शाकल्य ऋषिः॥ (आ. गे. २४०-१)॥ १४३॥

प्र सम्राजं चर्षणीनाम् (१०) इत्यृचः इरिमीढ ऋषिः। साम्नः चतुर्णाम् आद्ययोर्वार्षधरयोर्वृषधर ऋषिः। परयोः कुत्सस्य प्रस्तोकयोः कुत्स ऋषिः॥ (आ. गे. २४२-५)॥ १४४॥

॥ इति ऐन्द्रे द्वितीयेऽध्याये तृतीयः खण्डः॥

---

1. B मन्वते for मन्यवे
8. B My L. °स्मन for °स्मना; BMyL. साम्नो° for साम्नः
17. Sm. इरिंविढिः for इरिमीढः

## चतुर्थः खण्डः

अपादु शिप्र्यन्धसः (१) इत्यृचः श्रुतकक्षः ऋषिः। साम्नोरौपगवयोरुपगुः सौश्रवस ऋषिः॥ (ग्रा. गे. २४६-७)॥ १४५॥

इमा उ त्वा पुरूवसः (२) इत्यृचः भरद्वाज ऋषिः। साम्नः त्वाष्ट्रीसाम्नः त्वाष्ट्री ऋषिः। (ग्रा. गे. २४८)॥ १४६॥

अत्राह गोरमन्वत (३) इत्यृचः गौतम ऋषिः। साम्नोस्त्वष्टुरातिथ्ययोः त्वष्टा ऋषिः॥ (ग्रा. गे. २४९-२५०)॥ १४७॥

यदिन्द्रो अनयद्रितः (४) इत्यृचः भरद्वाज ऋषिः। साम्नोः पौषयोः पूषा ऋषिः। देवता च॥ (ग्रा. गे. २५१-२)॥ १४८॥

गौर्धयति मरुताम् (५) इत्यृचः बिन्दुः पूतदक्षो वा ऋषिः। साम्नोः श्यावाश्वयोः श्यावाश्वः ऋषिः॥ (ग्रा. गे. २५३-४)॥ १४९॥

उप नो हरिभिः सुतम् (६) इत्यृचः श्रुतकक्ष ऋषिः। साम्नोः सुतंरयिष्ठीययोः सुतंरयिष्ठ ऋषिः॥ (ग्रा. गे. २५५-६)॥ १५०॥

इष्टा होत्रा (७) इत्यृचः श्रुतकक्ष ऋषिः। साम्नः इष्टाहोत्रीयस्य अप्सरस ऋषिः॥ (ग्रा. गे. २५७)॥ १५१॥

अहमिद्धि (८) इत्यृचः वत्स ऋषिः। साम्नो निधनकामस्य प्रजापतिः ऋषिः॥ (ग्रा. गे. २५८)॥ १५२॥

रेवतीर्णः सधमाद (९) इत्यृचः शुनःशेप ऋषिः। साम्नो रैवत्यस्य रैवत्य ऋषिः। वाजदावर्यो वा प्रजापतिः ऋषिः॥ (ग्रा. गे. २५९) ॥१५३॥

सोमः पूषा (१०) इत्यृचः पूषा ऋषिः। सोमः पूषा [च] देवता। साम्नः सौमापूषस्य सोमः पूषा च देवता (ऋषी?)॥ (ग्रा. गे. २६०) ॥ १५४॥

॥ इति ऐन्द्रे द्वितीयेऽध्याये चतुर्थः खण्डः॥

13. सुतंरयिष्ठः See CN.
20. पूषा ऋषिः See CN.

## ॥ पञ्चमः खण्डः ॥

**पान्तमा वो अन्धसः** (१) इत्यृचः श्रुतकक्ष ऋषिः। साम्नां वैतहव्यानां वीतहव्य ऋषिः। ओकोनिधनं वा तृतीयं साम। अनुष्टुप् छन्दः। (ग्रा. गे. २६१-३) ॥ १५५ ॥

**प्र व इन्द्राय मादनम्** (२) इत्यृचः वसिष्ठ ऋषिः। साम्नां षण्णामाद्ये शाक्तिसामनी। तयोः शाकृत्य ऋषिः। तृतीयचतुर्थे गौरीविते। तयोर्गौरीवित ऋषिः। पञ्चमषष्ठयोः शाकृत्यः गौरीवितश्च ऋषिः ॥ (ग्रा. गे. २६४-९) ॥ १५६ ॥

**वयमु त्वा तदिदर्था** (३) इत्यृचो मेधातिथिः प्रियमेधाश्च द्वावृषी। साम्नोः काण्वयोः कण्व ऋषिः ॥ (ग्रा. गे. २७०-१) ॥ १५७ ॥

**इन्द्राय मद्वने सुतम्** (४) इत्यृचः श्रुतकक्ष ऋषिः। साम्नः (म्नां ?) आद्ययोर्गौरीवित ऋषिः। तृतीय[स्य] श्रौतकक्षस्य श्रुतकक्ष ऋषिः ॥ (ग्रा. गे. २७२-४) ॥ १५८ ॥

**अयं त इन्द्र सोमः** (५) इत्यृचः इरिमीढ ऋषिः। साम्नामाद्ययोः सौमित्रयोः सुमित्र ऋषिः। तृतीयस्य इहवद्दैवोदासस्य दिवोदास ऋषिः ॥ (ग्रा. गे. २७५-७) ॥ १५९ ॥

**सुरूपकृत्नुमूतये** (६) इत्यृचः मधुच्छन्दा ऋषिः। साम्नां चतुर्णामाद्यं शाकरवर्णम्। शाकर[वर्ण] ऋषिः। द्वितीयं रैणवम्। रेणुः ऋषिः। तृतीयचतुर्थे औदले। उदलो वैश्वामित्र ऋषिः ॥ (ग्रा. गे. २७८-२८१) ॥ १६० ॥

**अभि त्वा वृषभा सुते** (७) इत्यृचः त्रिशोक ऋषिः। साम्नां त्रयाणाम् आर्षभाणाम् ऋषभ ऋषिः ॥ (ग्रा. गे. २८२-४) ॥ १६१ ॥

---

14. Sm. इरिम्बिठिः for इरिमीढः

**य इन्द्र चमसेषु** (८) इत्यृचः कुसीतिः (दिः ?) [ऋषिः]। साम्नोः कौत्सयोः कुत्सः [ऋषिः]॥ (आ. गे. २८५-६) ॥ १६२ ॥

**योगेयोगे तवस्तरम्** (९) इत्यृचः शुनःशेपः ऋषिः। साम्नां सौमेधानां त्रयाणां सुमेधा ऋषिः ॥ (आ. गे. २८७-९) ॥ १६३ ॥

**आ त्वेता नि षीदत** (१०) इत्यृचः मधुच्छन्दाः [ऋषिः]। साम्नो दैवातिथस्य दै(दे ?)वातिथिः काण्वः ऋषिः (आ. गे. २९०) ॥ १६४ ॥

॥ इति ऐन्द्रे द्वितीयेऽध्याये पञ्चमः खण्डः ॥

॥ षष्ठः खण्डः ॥

**इदं ह्यन्वोजसा** (१) इत्यृचः विश्वामित्रः [ऋषिः]। आङ्गिरसानि त्रीणि सामानि। तेषामङ्गिरा ऋषिः। माधुच्छन्दसं वा प्रथमम्; कौत्सं द्वितीयम्; घृतश्चुन्निधनं तृतीयं वा ॥ (आ. गे. २९१-३) ॥ १६५ ॥

**महाँ इन्द्रः पुरश्च न** (२) इत्यृचः मधुच्छन्दा ऋषिः। सामानि त्रीणि वाम्राणि वा प्रि(प्रै ?)यमेधानि वा। प्रियमेधा ऋषिः॥ (आ. गे. २९४-६) ॥ १६६ ॥

**आ तू न [इन्द्र] क्षुमन्तम्** (३) इत्यृचः कुसीद ऋषिः। साम्नां चतुर्णामाद्ये गौरीविते। तयोर्गौरीवितः शाक्त्य ऋषिः। तृतीयचतुर्थे आकूपारे। तयोराकूपारयोराङ्गिरस ऋषिः॥ (आ. गे. २९७-३००) ॥ १६७ ॥

**अभि प्र गोपतिं गिरा** (४) इत्यृचः प्रियमेधः अभिप्रपाच्य ऋषिः। साम्नां त्रयाणाम् आद्ये धुरोः सामनी। गौरीवितं तृतीयम्। प्रथमद्वितीययोर्धुर ऋषिः। गौरीवितस्य शाक्त्य ऋषिस्तृतीयस्य॥ (आ. गे. ३०१-३०३) ॥ १६८ ॥

---

15. Sm. कुसीदी for कुसीदः; L. om. कुसीद........इत्यृचः L. 19.

19 अभिप्रपाच्य: See CN.



R. SK. S. LIBRARY
Acc. No... 626
Class No.

**कया नश्चित्र आ भुवत्** (५) इत्यृचो वामदेव ऋषिः। साम्नामाद्ये वाचःसामनी। वामदेव्यं तृतीयम्। आद्ययोर्वागृषिः। तृतीयस्य वामदेव ऋषिः॥ (ग्रा. गे. ३०४-६)॥ १६९॥

**त्यमु वः सत्रासाहम्** (६) इत्यृचः श्रुतकक्षः ऋषिः। साम्नोः सत्रासाहीययोरिन्द्र ऋषिः॥ (ग्रा. गे. ३०७-८)॥ १७०॥

**सदसस्पतिमद्भुतम्** (७) इत्यृचः मेधातिथिः ऋषिः। साम्नो वामदेव्यस्य वामदेव ऋषिः॥ (ग्रा. गे. ३०९)॥ १७१॥

**ये ते पन्था अधो दिवः** (८) इत्यृचः वामदेव ऋषिः। अश्विनोः साम्नः अश्विनावृषी॥ (ग्रा. गे. ३१०)॥ १७२॥

**भद्रं भद्रं न आ भर** (९) इत्यृचः श्रुतकक्ष ऋषिः। साम्नो गौतमस्य भद्रस्य गौतम ऋषिः॥ (ग्रा. गे. ३११)॥ १७३॥

**अस्ति सोमो अयं सुतः** (१०) इत्यृचः बिन्दुः पूतदक्षो वा ऋषिः। साम्नोऽश्विनोः अश्विनावृषी॥ (ग्रा. गे. ३१२)॥ १७४॥

॥ इति ऐन्द्रे द्वितीयेऽध्याये षष्ठः खण्डः॥

## ॥ सप्तमः खण्डः॥

**ईङ्खयन्तीरपस्युवः** (१) इत्यृचः इन्द्रमातरो देवजामय ऋषयः। साम्नः त्वाष्ट्रीसाम्नः त्वाष्ट्रीय ऋषिः॥ (ग्रा. गे. ३१३)॥ १७५॥

**नकि देवा** (२) इत्यृचः गोधा ऋषिः। साम्नश्च गोधा॥ (ग्रा. गे. ३१४)॥ १७६॥

---

2. B My. Om. आद्ययोर्वागृषिः
8. B My L. एते for ये ते
14. My LB. अनुवाकः for खण्डः
16. My LB. °जातयः for °जामयः
17. Sm. त्वष्टा for त्वाष्ट्रीय;
18. My LB. गोधाः for गोधा

**दोषो आगाद् बृहद्** (३) इत्यृचः दध्यङ्ङाथर्वण ऋषिः। साम्नः सवितुः साम्नः सविता ऋषिः। देवता च ॥ (ग्रा. गे. २१५) ॥ १७७ ॥

**एषो उषा अपूर्व्या** (४) इत्यृचः प्रस्कण्व ऋषिः। साम्नः औषसस्य उषा ऋषिः। सविता देवता ॥ (ग्रा. गे. २१६) ॥ १७८ ॥

**इन्द्रो दधीचो अस्थभिः** (५) इत्यृचः गौतम ऋषिः। साम्नोस्त्वष्टु-रातिथ्ययोः त्वष्टा ऋषिः ॥ (ग्रा. गे. २१७-८) ॥ १७९ ॥

**इन्द्रेहि मत्स्यन्धसः** (६) इत्यृचः मधुच्छन्दा ऋषिः। साम्नः पौषस्य पूषा ऋषिः ॥ (ग्रा. गे. २१९) ॥ १८० ॥

**आ तू न इन्द्र वृत्रहन्** (७) इत्यृचः वामदेवः ऋषिः। साम्नः इन्द्रस्य मायाया इन्द्रः [ऋषिः] ॥ (ग्रा. गे. २२०) ॥ १८१ ॥

**ओजस्तदस्य तित्विषः** (८) इत्यृचः वत्स ऋषिः। साम्नोरिन्द्रस्य सांवर्तयोरिन्द्र ऋषिः। संवर्तो आङ्गिरसः ॥ (ग्रा. गे. २२१-२) ॥ १८२ ॥

**अयमु ते समतसि** (९) इत्यृचः शुनःशेप ऋषिः। साम्नः शौनः-शेपस्यापि शुनःशेपः ऋषिः ॥ (ग्रा. गे २२३) ॥ १८३ ॥

**वात आ वातु भेषजम्** (१०) इत्यृचः वातायन उलः [ऋषिः]। वायुः देवता। साम्नः प्रतीचीनेडंकाशीतस्य काशीत ऋषिः ॥ (ग्रा. गे. २२४) ॥ १८४ ॥

॥ इति ऐन्द्रे द्वितीयेऽध्याये सप्तमः खण्डः ॥

## ॥ अष्टमः खण्डः ॥

**ये रक्षन्ति प्रचेतसः** (१) इत्यृचः कण्व ऋषिः। मित्रावरुणमुख्या आदित्या देवताः। साम्नः सौमित्रस्य सुमित्र ऋषिः ॥ (ग्रा. गे २२५) ॥ ॥ १८५ ॥

1. My LB. दध्यनकिराथर्वणः for दध्यङ्ङाथर्वणः See CN.
12. My LL. सां (सु° L.) वर्तोऽऽङ्गिरसः for संवर्तो आङ्गिरसः See C.N.

गव्यो षु णो यथा पुरा (२) इत्यृचः वंश ऋषिः। साम्नोः श्यावाश्वयोः श्यावाश्व ऋषिः॥ (ग्रा. गे. ३२६-७)॥ १८६॥

इमास्त इन्द्र पृश्नयः (३) इत्यृचः वत्सः ऋषिः। साम्नः शैखण्डिनस्य शिखण्डी ऋषिः॥ (ग्रा. गे. ३२८)॥ १८७॥

अया धिया च गव्यया (४) इत्यृचः श्रुतकक्ष ऋषिः। साम्नो वैतहव्यस्य वीतहव्य ऋषिः॥ (ग्रा. गे. ३२९)॥ १८८॥

पावका नः सरस्वती (५) इत्यृचः मधुच्छन्दा ऋषिः। सरस्वती देवता। साम्नो भारद्वाजस्य भरद्वाज ऋषिः॥ (ग्रा. गे. ३३०)॥ १८९॥

क इमं नाहुषीषु (६) इत्यृचः वामदेव ऋषिः। साम्न आरुणस्य वैतहव्यस्य अरुणो वीतहव्य ऋषिः॥ (ग्रा. गे. ३३१)॥ १९०॥

आ याहि सुषुमा हि ते (७) इत्यृचः इरिमीढ ऋषिः। साम्नः सौभरस्य सुभरिः ऋषिः॥ (ग्रा. गे. ३३२)॥ १९१॥

महि त्रीणामवरस्तु (८) इत्यृचः वारुणिः सत्यधृतिः [ऋषिः]। मित्रावरुणौ देवता। साम्नोः पाष्ठौहयोः पष्ठवाह् ऋषिः॥ (ग्रा. गे. ३३३-४)॥ १९२॥

त्वावतः पुरूवसो (९) इत्यृचः वंश ऋषिः। साम्नो सुरांसाकमश्वस्य साकमश्वः [ऋषिः]॥ (ग्रा. गे. ३३५)॥ १९३॥

इति ऐन्द्रे द्वितीयेऽध्याये अष्टमः खण्डः॥

॥ नवमः खण्डः॥

उत्त्वा मन्दन्तु सोमाः (१) इत्यृचः गाथ ऋषिः। साम्नो यामस्य यमः [ऋषिः]॥ (ग्रा. गे. ३३६)॥ १९४॥

---

1. B My L. पुरम् for पुरा; MyB. वाशः for वंशः
11. Sm. इरिम्बिठिः for इरिमीढः
13. My B. L. वारुणी for वारुणिः
20. Sm. प्रगाथः for गाथः

**गिर्वणः पाहि नः सुतम्** (२) इत्यृचः विश्वामित्र ऋषिः। साम्न आङ्गिरसस्य हरिश्रीनिधनस्य अङ्गिरा ऋषिः॥ (ग्रा. गे. ३३७)॥ १९५॥

**सदा व इन्द्रः** (३) इत्यृचः वामदेव ऋषिः। साम्नो वैरूपस्य विरूपाङ्गिरस ऋषिः॥ (ग्रा. गे. ३३८)॥ १९६॥

**आ त्वा विशन्त्विन्दवः** (४) इत्यृचः श्रुतकक्षः ऋषिः। साम्नः सिन्धुषाम्नः असितः ऋषिः॥ (ग्रा. गे. ३३९)॥ १९७॥

**इन्द्रमिद्गाथिनो बृहत्** (५) इत्यस्य[ा] ऋचः मधुच्छन्दा ऋषिः। साम्नोऽर्कस्य यम ऋषिः॥ (ग्रा. गे. ३४०)॥ १९८॥

**इन्द्र इषे ददातु न** (६) इत्यृचः श्रुतकक्षः ऋषिः। साम्नोः सौमित्रयोः सुमित्रः [ऋषिः]॥ (ग्रा. गे. ३४१-२)॥ १९९॥

**इन्द्रो [अङ्ग] महद्भयम्** (७) इत्यृचः गृत्समदः ऋषिः। साम्नः अभयंकरस्य इन्द्र ऋषिः॥ (ग्रा. गे. ३४३)॥ २००॥

**इमा उ त्वा सुतेसुते** (८) इत्यृचः भरद्वाज ऋषिः। साम्नस्त्वाष्ट्रीसाम्नस्त्वष्टा ऋषिः॥ (ग्रा. गे. ३४४)॥ २०१॥

**इन्द्रा नु पूषणा वयम्** (९) इत्यृचः [भरद्वाजः ऋषिः।] इन्द्रापूषणौ देवते। साम्नः पौषस्य पूषा ऋषिः॥ (ग्रा. गे. ३४५)॥ २०२॥

**न कि इन्द्र त्वम्** (द्!) (१०) इत्यृचः वामदेव ऋषिः। साम्न इन्द्राण्याः साम्नः इन्द्राणी ऋषिः॥ (ग्रा. गे. ३४६)॥ २०३॥

इत्यैन्द्रे द्वितीयेऽध्याये नवमः खण्डः

---

6. B. सिन्धुषामाण्यषितः। My सशुषाम्नासितः॥ L. सिन्धुषाकौण्यसितः for सिन्धुषाम्नः असितः

10. B. My सुमित्रौ, L. सुमित्रसि for सुमित्र ऋषिः

15. LMy व for नु

## दशमः खण्डः

**तरणिं वो जनानाम्** (१) इत्यृचः त्रिशोक ऋषिः। साम्नः श्यावाश्वस्य श्यावाश्व ऋषिः ॥ (ग्रा. गे. ३४७) ॥ २०४ ॥

**असृग्रमिन्द्र ते गिरः** (२) इत्यृचः मधुच्छन्दा ऋषिः। साम्नो वैरूपस्य विरूप ऋषिः ॥ (ग्रा. गे. ३४८) ॥ २०५ ॥

**सुनीथो घा स मर्त्यो** (३) इत्यृचः वंशः ऋषिः। साम्नः सौमित्रस्य सुमित्रः ऋषिः ॥ (ग्रा. गे. ३४९) ॥ २०६ ॥

**यद्वीडाविन्द्र** (४) इत्यृचः त्रिशोक ऋषिः। साम्नस्तौभस्य तुभः ऋषिः। (ग्रा. गे. ३५०) ॥ २०७ ॥

**श्रुतं वो वृत्रहन्तमम्** (५) इत्यृचः श्रुतकक्षः[ऋषिः]। साम्नः श्रौतस्य श्रुतः ऋषिः ॥ (ग्रा. गे. ३५१) ॥ २०८ ॥

**अरं त इन्द्र श्रवसे** (६) इत्यृचः श्रुतकक्षः (वामदेवः?) ऋषिः। साम्न आमीशवस्य अमीशवः ऋषिः ॥ (ग्रा. गे. ३५२) ॥ २०९ ॥

**धानावन्तं करम्भिणम्** (७) इत्यृचः विश्वामित्रः ऋषिः। साम्नः पौषस्य पूषा ऋषिः ॥ (ग्रा. गे. ३७३) ॥ २१० ॥

**अपां फेनेन** (८) इत्यृचः गौपूक्त्याश्वसूक्तिनौ [ऋषी]। साम्नः क्षुरपविणः इन्द्रः ऋषिः ॥ (ग्रा. गे. ३५४) ॥ २११ ॥

**इमे त इन्द्र सोमाः** (९) इत्यृचः वामदेवः [ऋषिः]। साम्नः सौमित्रस्य सुमित्र ऋषिः ॥ (ग्रा. गे. ३५५) ॥ २१२ ॥

---

6. Sm. वंसः for वंशः
10. Sm. श्रुकक्षः for श्रुतकक्षः
12. श्रुतकक्षः See CN.
16. Sm. गोपूक्त्या° for गौपूक्त्या°

तुभ्यं सुतासः सोमाः (१०) इत्यृचः श्रुतकक्षः ऋषिः। साम्नः सौमित्रस्य सुमित्रः [ऋषिः] ॥ (ग्रा. गे. ३५६) ॥ २१३ ॥

इति ऐन्द्रे द्वितीयेऽध्याये दशमः खण्डः

---

## एकादशः खण्डः

आ व इन्द्रं कृविं यथा (१) इत्यृचः शुनःशेपः ऋषिः। साम्नः कौत्सस्य कुत्स ऋषिः ॥ (ग्रा. गे. ३५७) ॥ २१४ ॥

अतश्चिदिन्द्र न उपा याहि (२) इत्यृचः श्रुतकक्षः ऋषिः। साम्नः कौत्सस्य कुत्सः ऋषिः ॥ (ग्रा. गे. ३५८) ॥ २१५ ॥

आ बुन्दं वृत्रहा (३) इत्यृचः त्रिशोकः ऋषिः। साम्न औषसस्य उषा ऋषिः ॥ (ग्रा. गे. ३५९) ॥ २१६ ॥

बृहदुक्थं हवामहे (४) इत्यृचः मेधातिथिः ऋषिः। साम्नः भारद्वाजस्य भरद्वाजः [ऋषिः] ॥ (ग्रा. गे. ३६०) ॥ २१७ ॥

ऋजुनीती नो वरुणः (५) इत्यृचः गौतमः ऋषिः। [साम्नः] कौत्सस्य कुत्सः ऋषिः ॥ (ग्रा. गे. ३६१) ॥ २१८ ॥

दूरादिहेव यत्सतः (६) इत्यृचः मेधातिथिः ऋषिः। साम्नः औषसस्य उषा ऋषिः ॥ (ग्रा. गे. ३६२) ॥ २१९ ॥

आ नो मित्रावरुणा (७) इत्यृचः विश्वामित्रो जमदग्निर्वा ऋषिः। साम्नो मित्रावरुण[योः सं]योजनस्य मित्रावरुणौ ऋषी ॥ (ग्रा. गे. ३६३) ॥ २२० ॥

उदु त्ये सूनवो गिरः (८) इत्यृचः प्रस्कण्वः काण्वः [ऋषिः]। साम्नो ऋतुषाम्णो ऋतव ऋषिः (०षयः?)॥ (ग्रा. गे. ३६४) ॥ २२१ ॥

---

20. MyBL. विश्वामित्रो जमदग्निर्वा for प्रस्कण्वः काण्वः See CN.

इदं विष्णुर्वि चक्रमे (९) इत्यृचः मेधातिथिः ऋषिः । साम्नो विष्णोः साम्नः विष्णुः ऋषिः । देवता च ॥ (आ. गे. ३६५) ॥ २२२ ॥

इति ऐन्द्रे द्वितीयेऽध्याये एकादशः खण्डः

---

## द्वादशः खण्डः

अतीहि मन्युषाविणम् (१) इत्यृचः मेधातिथिः ऋषिः । साम्नः कौत्सस्य कुत्सः ऋषिः ॥ (आ. गे. ३६६) ॥ २२३ ॥

कदु प्रचेतसे (२) इत्यृचः वामदेव ऋषिः । साम्नः काश्यपस्य कश्यप ऋषिः ॥ (आ. गे. ३६७) ॥ २२४ ॥

उक्थं च न शस्यमानम् (३) इत्यृचः मेधातिथिप्रियमेधौ [ऋषी] । साम्नो बार्हदुक्थस्य बृहदुक्थो वाम्नेयः ॥ (आ. गे. ३६८) ॥ २२५ ॥

इन्द्र उक्थेभिः (४) इत्यृचः विश्वामित्र ऋषिः । साम्नो बार्हदुक्थस्य बृहदुक्थो वाम्नेयः ॥ (आ. गे. ३६९) ॥ २२६ ॥

आ याह्युप न[ःसुत]म् (५) इत्यृचः मेधातिथिराङ्गिरसः प्रियमेधः ऋषिः । साम्नः कौत्सस्य कुत्सः ऋषिः ॥ (आ. गे. ३७०) ॥ २२७ ॥

कदा वसो स्तोत्रम् (६) इत्यृचः दुर्मित्रः ऋषिः । साम्नोः कौत्सयोः कुत्स ऋषिः ॥ (आ. गे. ३७१-२) ॥ २२८ ॥

ब्राह्मणादिन्द्र राधसः (७) इत्यृचः मेधातिथिः ऋषिः । साम्नः और्ध्वसद्मनस्य ऊर्ध्वसद्मा ऋषिः ॥ (आ. गे. ३७३) ॥ २२९ ॥

---

9. B My ins. ऋषि. after मेधातिथि°
10. B My बृहदुक्थस्य for बार्हदुक्थस्य
13. B My L. °मेधा for मेधः.
14. B My L. बार्हदुक्थस्य बृहदुक्थः for कौत्सस्य कुत्सः See CN.
18. B My L. कौत्सस्य कुत्सः for और्ध्वसद्मनस्य ऊर्ध्वसद्मा. See CN.

**वयं घा ते अपि ष्मसि** (८) इत्यृचः मेधातिथिः ऋषिः। साम्नः और्ध्वसद्मनस्य ऊर्ध्वसद्मा ऋषिः॥ (आ. गे. ३७४)॥ २३०॥

**एन्द्र पृक्षु कासु [चिन्नृम्ण]म्** (९) इत्यृचः [विश्वामित्र ऋषिः]। साम्नः औदलस्य अभीपाद उदल ऋषिः॥ (आ. गे. ३७५)॥ २३१॥

**एवा ह्यसि वीरयुः** (१०) इत्यृचः मधुच्छन्दा ऋषिः। आमहीयवस्य आमहीयुः ऋषिः॥ (आ. गे. ३७६)॥ २३२॥

इत्यैन्द्रे द्वितीयेऽध्याये द्वादशः खण्डः

एवमैन्द्र्यस्तु गायत्र्यः शतमष्टादशाधिकम्।
षडशीतिशतं (!) साम्नामाम्नातानि महर्षिभिः॥

॥ इति द्वितीयोऽध्यायः॥

# तृतीयोऽध्यायः

अथैन्द्रयो बृहत्योऽनुवाकाष्टकैराम्नाताः। त्रिभिस्त्रैष्टुभ्यः एकेनानुष्टुभस्तृतीयाध्याये आम्नाताः ॥

## प्रथमः खण्डः

**अभि त्वा शूर नोनुमः** (१) इत्यृचः वसिष्ठ ऋषिः। इन्द्रो देवता। बृहती छन्दः। एवमुत्तरत्र। आसामपि एकोनसप्ततिसंख्याकर्चां बृहती छन्दः। इन्द्रो देवता। अन्यासामेकादशर्चां देवताविशेषस्तत्र वक्ष्यते। साम्नोर्भरद्वाजस्यार्कयोः भरद्वाजः ऋषिः॥ (ग्रा. गे. २७७-८) ॥ २३३ ॥

**त्वामिद्धि हवामहे** (२) इत्यृचो भरद्वाज ऋषिः। तत्साम्नोर्भारद्वाजयोश्च भरद्वाज ऋषिः ॥ (ग्रा. गे. २७९-२८० ॥ २३४ ॥

**अभि प्र वः सुराधसम्** (३) इत्यृचः वालखिल्या ऋषयः। साम्नामाद्ययोः सांनतयोः संनतिः ऋषिः। तृतीयस्य ऐडैतस्य प्रजापतिः ऋषिः ॥ (ग्रा. गे. २८१-३) ॥ २३५ ॥

**तं वो दस्ममृतीषहम्** (४) इत्यृचः नोधा ऋषिः। साम्नां पञ्चानामाद्यस्य नाकस्य नाविक ऋषिः। द्वितीयस्याभीवर्तस्य प्रजापतिः ऋषिः। तृतीयस्य भागस्य भग ऋषिः। चतुर्थस्य इन्द्रस्याभीवर्तस्य इन्द्रः ऋषिः। पञ्चमस्य नौध[स]स्य नोधा[ः] काक्षीवतः ऋषिः॥ (ग्रा. गे. २८४-८) ॥ २३६ ॥

**तरोभिर्वो विदद्वसुम्** (५) इत्यृचः कलिः प्रगाथः ऋषिः। साम्नां सप्तानामाद्ययोर्लौशयोर्लुशः ऋषिः। द्वितीयतृतीययोः (तृतीयचतुर्थयोः ?)

---

2. My त्रैष्टुभः for त्रैष्टुभ्यः. See CN ;My BL. एकोना° for एकेना°.

11. Sm. प्रस्कण्वः काण्वः for वालखिल्याः

15. नाकस्य. See CN.

20. My लौशयोः लुशः for लोशयोः लुश

धानाकयोः धन[ा]कः ऋषिः। [पक्षान्तरे] चतुर्थस्य क्षुल्लककालेयस्य क्षुल्लककलिः ऋषिः। [पञ्चम-] षष्ठसप्तमयोः (सप्तमानां ?) कालेययोः (कालेयानां ?) कलिः ऋषिः। पक्षान्तरे सर्वेषां सप्तानां कलिरेव वा ऋषिः॥ (ग्रा. गे. ३८९-३९५)॥ २३७॥

तरणिरित्सिषासति (६) इत्यृचो वसिष्ठः ऋषिः। साम्नां चतुर्णामाद्ययोरैषिरयोरिषिर ऋषिः। परयोर्गौश्रृङ्गयोर्गोश्रृङ्गः ऋषिः॥ (ग्रा. गे. ३९६-९)॥ २३८॥

पिबा सुतस्य रसिनः (७) इत्यृचो मेधातिथिः ऋषिः। साम्नामाद्यस्य पृष्ठस्य प्राजापत्यः ऋषिः। द्वितीयस्य शौल्कस्य शुल्कः ऋषिः। तृतीयस्य जमदग्नेरभीवर्तस्य जमदग्निः ऋषिः॥ (ग्रा. गे. ४००-२)॥ २३९॥

त्वं ह्येहि चेरवे (८) इत्यृचो भगः ऋषिः। साम्नोः कौल्मलबर्हिषयोः कुल्मलबर्हिः ऋषिः॥ (ग्रा. गे. ४०३-४)॥ २४०॥

न हि वश्चरमं च न (९) इत्यृचो वसिष्ठः ऋषिः। मरुतो देवता। साम्नोर्वसिष्ठस्य जनित्रयोः वसिष्ठः ऋषिः॥ (ग्रा. गे. ४०५-६)॥ २४१॥

मा चिदन्यद्वि शंसत (१०) इत्यृचः प्रगाथः काण्वः ऋषिः। साम्नो मैधातिथस्य मेधातिथिः काण्वः ऋषिः॥ (ग्रा. गे. ४०७)॥ २४२॥

॥ इत्यैन्द्रे तृतीयेऽध्याये प्रथमः खण्डः॥ १॥

## द्वितीयः खण्डः

नकिष्टं कर्मणा नशत् (१) इत्यृचः पुरुहन्मा ऋषिः। साम्नो वैखानसस्य [आद्यस्य] विखनाः, द्वितीयस्य पौरुहन्मनस्य पुरुहन्मा ऋषिः॥ (ग्रा. गे. ४०८-९)॥ २४३॥

---

6. My BL. इषिरजः for इषिरः

9. Sm, पृष्ठः for प्राजापत्यः Sm. शौल्कः ; शुक्रः for शौल्कस्य शुल्कः

13. My BL. trans. मरुतो देवता after ऋषिः।

16. LB. काण्व्यः for काण्वः

**य ऋते चिदभिश्रिषः** (२) इत्यृचो मेधातिथिः [ऋषिः]। साम्नः सात्यस्य सत्यः ऋषिः ॥ (ग्रा. गे. ४१०) ॥ २४४ ॥

**आ त्वा सहस्रमा शतम्** (३) इत्यृचो मेधातिथिः मेध्यातिथिः[च] ऋषिः (षी ?)। साम्नां चतुर्णां भारद्वाजानां भरद्वाजः ऋषिः। अथवा द्वितीयस्य कण्वबृहतः कण्वः ऋषिः ॥ (ग्रा. गे. ४११-४) ॥ २४५॥

**आ मन्द्रैरिन्द्र हरिभिः** (४) इत्यृचो विश्वामित्रः ऋषिः। साम्नां बाभ्राणां त्रयाणां बाभ्रः ऋषिः ॥ (ग्रा. गे. ४१५-७) ॥ २४६ ॥

**त्वमङ्ग प्र शंसिषः** (५) इत्यृचः रहूगणपुत्रो गौतमः ऋषिः। साम्नोऽग्नेर्गौङ्गवस्य अग्निर्गुङ्गुः ऋषिः। गुङ्गुर्वा ॥ (ग्रा. गे. ४१८) ॥ २४७ ॥

**त्वमिन्द्र यशा असि** (६) इत्यृचः नृमेधः पुरुमेधो वा ऋषिः। साम्नोः (°म्नां!) इन्द्रस्य यशसोः (°साम् !) [पञ्चानाम्] इन्द्रः ऋषिः। द्वितीयं साभ्रं वा। [तस्य] साभ्रः ऋषिः ॥ (ग्रा. गे. ४१९-२३) ॥ २४८ ॥

**इन्द्रमिद्देवतातयः** (७) इत्यृचः मेधातिथिः ऋषिः। साम्नो यौक्तस्रुचस्य युक्तस्रुचः ऋषिः ॥ (ग्रा. गे. ४२४) ॥ २४९ ॥

**इमा उ त्वा पुरूवसः** (८) इत्यृचः मेधातिथिः ऋषिः। साम्नां त्रयाणामात्राणामत्रिः ऋषिः ॥ (ग्रा. गे. ४२५-७) ॥ २५० ॥

**उदु त्ये मधुमत्तम** (९) इत्यृचो मेध्यातिथिः ऋषिः। साम्नां वासिष्ठानां त्रयाणां वसिष्ठः ऋषिः ॥ (ग्रा. गे. ४२८-३०) ॥ २५१ ॥

---

7. Sm. बभ्रः for बाभ्रः

8. B My L. रभूगण° for रहूगण°.

10. In Sm. both नृमेध and पुरुमेध are the ṛṣis of this verse; साम्नोः See CN.

यथा गौरो अपा कृतम् (१०) इत्यृचो देवातिथिः काण्व ऋषिः। साम्नोर्गौतमस्य मनाययोः गौतमः ऋषिः (आ. गे. ४२१-२)॥ २५२॥

इत्यैन्द्रे तृतीयेऽध्याये द्वितीयः खण्डः॥ २॥

तृतीयः खण्डः

शग्ध्यूषु शचीपते (१) इत्यृचो भर्गः ऋषिः। साम्नां त्रयाणां हारायणानाम् इन्द्रः ऋषि॥ (आ. गे. ४३३-५)॥ २५३॥

या इन्द्र भुज आभरः (२) इत्यृचो रेभः काश्यपः ऋषिः। साम्नां वाभ्राणां त्रयाणां वाभ्रः ऋषिः॥ (आ. गे. ४३६-८)॥ २५४॥

प्र मित्राय प्रार्यम्णे (३) इत्यृचो जमदग्निः ऋषिः। आदित्यो देवता। साम्नां वरुणसाम्नां त्रयाणां वरुणः ऋषिः (आ. गे. ४३९-४४१) ॥ २५५॥

अभि त्वा पूर्वपीतये (४) इत्यृचो मेध्यातिथिः ऋषिः। साम्नो वषट्कारणिधनस्य प्रजापतिः ऋषिः॥ (आ. गे. ४४२)॥ २५६॥

प्र व इन्द्राय बृहते (५) इत्यृचः नृमेधपुरुमेधावृषी। धृषतो मारुतस्य साम (म्नः?) धृषन्मारुतः ऋषिः॥ (आ. गे. ४४३)॥ २५७॥

साम्नां संज्ञानानां चतुर्णामिन्द्रः ऋषिः। अथास्यामृचि सन्त्वाहिन्वन्ति, सन्त्वाकृणन्ति, सन्त्वा ततक्षुः सन्त्वा शिशन्ति इति चतुर्भिः स्तोभैः बृहदिन्द्राय गायत (६) इति चतुर्भिः पादैः चत्वार्यपि गेयानि। आदितस्त्रयस्तोभाः सामान्तिमाः[त्रयश्च] गीताः (गेयाः?) चतुर्थ (र्थः) सामाद्य-

---

2. Sm. मनाज्ययोः for मनाययोः
12. Sm. मेधातिथिः for मेध्यातिथिः
16. BMyL. अप्यस्याम् for अथास्याम् See CN.
17. My ततक्षुः, L. ततक्षाः for ततक्षुः; L. चतुर्थ for चतुर्भिः
19. सामान्तिमाः See CN.

[न्त]स्तोभाः (भः?) । उभयविधस्तोभोऽपि चतुर्षु सामसु गेयः ॥ (ग्रा. गे. ४४४-५)॥२५८॥

**इन्द्र क्रतुं न आभर** (७) इत्यृचः वसिष्ठः ऋषिः । साम्नां त्रयाणम् आद्ये बाभ्रे । वासिष्ठं तृतीयम् ॥ बाभ्रवासिष्ठावृषी ॥ (ग्रा. गे. ४४६-८) २५९ ॥

**मा न इन्द्र परा वृणक्** (८) इत्यृचः रेभः ऋषिः । साम्नोराजिगयोराजिगो दानवः ऋषिः ॥ (ग्रा. गे, ४४९-५०) ॥ २६० ॥

**वयं घ त्वा सुतावन्तः** (९) इत्यृचः मेध्यातिथिः ऋषिः । साम्नां चतुर्णामाद्यम् आष्कारणिधनं काण्वम् । अस्य काण्वस्य कण्व ऋषिः । महावैष्टम्भं द्वितीयम् । विष्टम्भः ऋषिः । तृतीयमभिनिधनं काण्वम् । कण्व ऋषिः । चतुर्थं दिङ्निधनं महावैष्टम्भम् । विष्टम्भः ऋषिः ॥ (ग्रा. गे. ४५१-४) ॥ २६१ ॥

**यदिन्द्र नाहुषीष्वा** (१०) इत्यृचः भरद्वाजः ऋषिः । साम्नः श्रौष्टीगवस्य श्रुष्टीगुः ऋषिः ॥ (ग्रा. गे. ४५५) ॥ २६२ ॥

॥ इत्यैन्द्रे तृतीयेऽध्याये तृतीयः खण्डः ॥ ३ ॥

## चतुर्थः खण्डः

**सत्यमित्था वृषेदसि** (१) इत्यृचः मेधातिथिः ऋषिः । साम्न इन्द्रस्य वृषकस्य इन्द्रः ऋषिः (ग्रा. गे. ४५६) ॥ २६३ ॥

**यच्छक्रासि परावति** (२) इत्यृचो रेभः ऋषिः । साम्नोः द्वैगतयोः द्विगद्भार्गव ऋषिः ॥ (ग्रा. गे. ४५७-८) ॥ २६४ ॥

---

4. My B. बाचे for बाभ्रे See CN.
8. Sm. मेधा° for मेध्या°
14. My श्रोष्टोभवस्य for श्रौष्टीगवस्य
15,16. अनुवाकः for खण्डः
17. L. Om. ऋषिः

अभि वो वीरमन्धसः (३) इत्यृचः वंश ऋषिः। साम्नः कार्तयशसस्य कृतयशा ऋषिः ॥ (ग्रा. गे. ४५९) ॥ २६५ ॥

इन्द्र त्रिधातु शरणम् (४) इत्यृचः भरद्वाजः ऋषिः। इन्द्रस्य शरणस्य इन्द्रः ऋषिः ॥ (ग्रा. गे. ४६०) ॥ २६६ ॥

श्रायन्त इव सूर्यम् (५) इत्यृचः नृमेधः ऋषिः। साम्नः श्रायन्तीयस्य प्रजापतिः ऋषिः ॥ (ग्रा. गे. ४६१) ॥ २६७ ॥

न सीमदेव आप तत् (६) इत्यृचः पुरुहन्मा ऋषिः। साम्नो याम्रस्य याम्र ऋषिः ॥ (ग्रा. गे. ४६२) ॥ २६८ ॥

आ नो विश्वासु हव्यम् (७) इत्यृचः नृमेधपुरुमेधावृषी। साम्नां वैय्यश्वानां त्रयाणां व्यश्व आङ्गिरस ऋषिः ॥ (ग्रा. गे. ४६३-५) ॥ २६९ ॥

तवेदिन्द्रावमं वसु (८) इत्यृचः वसिष्ठः ऋषिः। साम्नो निधनकामस्य प्रजापतिः ऋषिः ॥ (ग्रा. गे. ४६६) ॥ २७० ॥

क्वेयथ क्व (९) इत्यृचो मेधातिथिमेध्यातिथी ऋषी। साम्नां त्रयाणामिन्द्रस्य प्रियाणामिन्द्रः ऋषिः ॥ (ग्रा. गे. ४६७-९) ॥ २७१ ॥

वयमेनमिदा ह्यः (१०) इत्यृचः कलिः ऋषिः। साम्नामिन्द्रस्य वैरूपाणां त्रयाणामिन्द्रः ऋषिः। वसिष्ठो वा ॥ (ग्रा. गे. ४७०-२) ॥ २७२ ॥

॥ इत्यैन्द्रे तृतीयेऽध्याये चतुर्थः खण्डः ॥ ४ ॥

---

1. My BL. अभी for अभि ; Sm. वत्सः for वंशः

17. अनुवाकः for खण्डः

## पञ्चमः खण्डः

यो राजा चर्षणीनाम् (१) इत्यृचः पुरुहन्मा ऋषिः। साम्नोराधस्य पौरुहन्मनस्य पुरुहन्मा वैखानसः ऋषिः॥ द्वितीयस्य प्राकर्षस्य प्रकर्ष ऋषिः॥ (ग्रा. गे. ४७३-४)॥ २७३॥

यत इन्द्र भयामहे (२) इत्यृचः भर्गः ऋषिः। साम्नः अभयंकरस्य इन्द्रः ऋषिः॥ (ग्रा. गे. ४७५)॥ २७४॥

वास्तोष्पते (३) इत्यृचः इरिमीढः ऋषिः। साम्नोः काश्यपयोः कश्यपः ऋषिः॥ (ग्रा. गे. ४७६-७)॥ २७५॥

बण्महाँ असि (४) इत्यृचः जमदग्निः ऋषिः। सूर्यो देवता। साम्नः सूर्यस्य साम्नः सूर्यः ऋषिः॥ (ग्रा. गे. ४७८)॥ २७६॥

अश्वी रथी सुरूपः (५) इत्यृचः देवातिथिः ऋषिः। साम्नोरानुपयोः वध्रीयश्च आनूपः ऋषिः॥ (ग्रा. गे. ४७९-४८०)॥ २७७॥

यद् द्याव इन्द्र ते शतम् (६) इत्यृचः [पुरुहन्मा ऋषिः।] साम्नो वैरूपस्य विरूपः ऋषिः (ग्रा. गे. ४८१)॥ २७८॥

यदिन्द्र प्रागपागुदक् (७) इत्यृचो देवातिथिः ऋषिः। साम्नोर्नैपातिथयोः निपातिथिः ऋषिः॥ (ग्रा. गे. ४८२-३)॥ २७९॥

कस्तमिन्द्र त्वा (८) इत्यृचः वसिष्ठः ऋषिः। साम्नोः बृहत्कौमुदस्य साम्नोः बृहत्कुमुदः ऋषिः॥ (ग्रा. गे. ४८४-५)॥ २८०॥

इन्द्राग्नी अपात् (९) इत्यृचः भरद्वाजः ऋषिः। साम्नो वाचःसाम्नः वागृषिः। इन्द्राग्नी देवते। (ग्रा. गे. ४८६)॥ २८१॥

---

7. Sm. इरिम्बिठिः for इरिमीढः; MyB. काव्ययोः कवः, for काश्यपयोः कश्यपः

15. My. साम्नः for साम्नोः

इन्द्र नेदीय एदिहि (१०) इत्यृचः वालखिल्याः ऋषयः। साम्नोर्वाभ्रयोः वाभ्रः ऋषिः ॥ (ग्रा. गे. ४८७-८) ॥ २८२ ॥

॥ इत्यैन्द्रे तृतीऽध्याये पञ्चमः खण्डः ॥

---

## षष्ठः खण्डः

इत ऊती वो अजरम् (१) इत्यृचः नृमेधः ऋषिः। साम्नोः बार्हतयोः (गौरीवितयोः ?) गौरीवितिः ऋषिः ॥ (ग्रा. गे. ४८९-४९०) ॥ २८३ ॥

मो षु त्वा वाघतश्च न (२) इत्यृचः वसिष्ठः ऋषिः। साम्नोरात्रेययोः अत्रिः ऋषिः ॥ (ग्रा. गे. ४९१-२) ॥ २८४ ॥

सुनोत सोम (३) इत्यृचः वसिष्ठः ऋषिः। साम्नोर्गौरीवितयोः गौरीवितिः ऋषिः ॥ (ग्रा. गे. ४९३-४) ॥ २८५ ॥

यः सत्राहा विचर्षणिः (४) इत्यृचः भरद्वाजः ऋषिः। साम्नो वामदेव्यस्य वामदेवः ऋषिः ॥ (ग्रा. गे. ४९५) ॥ २८६ ॥

शचीभिर्नः शचीवसू (५) इत्यृचः परुच्छेपः ऋषिः। अश्विनौ देवते। साम्नः अश्विनोः साम्नः अश्विनावृषी ॥ (ग्रा. गे. ४९६) ॥ २८७ ॥

यदा कदा च मीढुषे (६) इत्यृचः वामदेवः ऋषिः। वरुणो देवता। साम्नां वसिष्ठस्य पञ्चाणां त्रयाणां वसिष्ठः ऋषिः ॥ (ग्रा. गे. ४९७-९९) ॥ २८८ ॥

पाहि गा अन्धसः (७) इत्यृचः मेध्यातिथिः ऋषिः। साम्नोः सौभरयोः सौभरिः ऋषिः ॥ (ग्रा. गे. ५००-१) ॥ २८९ ॥

---

14. MyLB वसो for °वसू ; MyLB. पापइछेपः for परुच्छेपः.

16. वरुणो देवता See CN.

19. Sm. मेधातिथिः for मेध्यातिथिः

**उभयं शृणवच्च नः** (८) इत्यृचः भर्गः ऋषिः। साम्नो वैयश्वस्य व्यश्वः ऋषिः (ग्रा. गे. ५०२) ॥ २९० ॥

**महे च न त्वाद्रिवः** (९) इत्यृचः मेधातिथि-मेध्यातिथी ऋषी। साम्नोः इन्द्रस्य सहस्रायुतीययोः इन्द्रः प्रजापतिर्वा ऋषिः ॥ (ग्रा. गे. ५०३-४) ॥ २९१ ॥

**वस्याँ इन्द्रासि मे पितुः** (१०) इत्यृचः मेधातिथिमेध्यातिथी ऋषी। साम्नः इन्द्राण्याः साम्नः इन्द्राणी ऋषिका ॥ (ग्रा. गे. ५०५) ॥ २९२ ॥

॥ इत्यैन्द्रे तृतीयेऽध्याये षष्ठः खण्डः ॥

## सप्तमः खण्डः

**इम इन्द्राय सुन्विरे** (१) इत्यृचः वसिष्ठः ऋषिः। साम्नः सौभरस्य सुभरिः ऋषिः ॥ (ग्रा. गे. ५०६) ॥ २९३ ॥

**इम इन्द्र मदाय ते** (२) इत्यृचः वामदेवः[ऋषिः]। विश्वामित्र इत्येके। साम्नो गार्त्समदस्य गृत्समदः ऋषिः ॥ (ग्रा. गे. ५०७) ॥ २९४ ॥

**आ त्वाद्य सबर्दुघाम्** (३) इत्यृचः मेधातिथि-मेध्यातिथी ऋषी। साम्नो वाचः साम्नः वागृषिः ॥ (ग्रा. गे. ५०८) ॥ २९५ ॥

**न त्वा बृहन्तः** (४) इत्यृचः नोधा ऋषिः। साम्नो बार्हदुक्थस्य बृहदुक्थो वाम्नेयः ऋषिः ॥ (ग्रा. गे. ५०९) ॥ २९६ ॥

---

2. MyLB. विश्वः for व्यश्वः
3. MyLB. त्वामद्रिवः for त्वाद्रिवः
4. MyLB. ऋषी for ऋषिः
14. MyLB. साबर् for सबर्; MyB. मेधातिथिमेध्यातिथिः for मेधातिथि-मेध्यातिथी.
17. My वाह्मेयः for वाम्नेयः

क ईं वेद सुते सचा (५) इत्यृचः मेधातिथिः ऋषिः। साम्नो वार्शस्य वार्शः ऋषिः ॥ (ग्रा. गे. ५१०) ॥ २९७ ॥

यदिन्द्र शासो अव्रतम् (६) इत्यृचः वामदेवः ऋषिः। साम्नस्तौरश्रवस्य तुरश्रवाः ऋषिः (ग्रा. गे. ५११) ॥ २९८ ॥

त्वष्टा नो दैव्यम् (७) इत्यृचो वामदेवः ऋषिः। बहुदैवते[त्येके]। साम्नस्त्वाष्ट्रीयसाम्नः त्वाष्ट्री ऋषिः ॥ (ग्रा. गे. ५१२) ॥ २९९ ॥

कदा चन स्तरीरसि (८) इत्यृचः बालखिल्याः ऋषयः। साम्नः अदितेः साम्नः अदितिः ऋषिः ॥ (ग्रा. गे. ५१३) ॥ ३०० ॥

युङ्क्ष्वा हि वृत्रहन्तम (९) इत्यृचः मेध्यातिथिः ऋषिः। साम्न अ(आ?) जीगर्तस्य अजीगर्तिः ऋषिः ॥ (ग्रा. गे. ५१४) ॥ ३०१ ॥

त्वामिदा ह्यो नरः (१०) इत्यृचो नृमेधः ऋषिः। साम्नो माधुच्छन्दसस्य मधुच्छन्दा ऋषिः ॥ (ग्रा. गे. ५१५) ॥ ३०२ ॥

॥ इत्यैन्द्रे तृतीयेऽध्याये सप्तमः खण्डः ॥

---

### अष्टमः खण्डः

प्रत्यु अदर्श्यायति (१) इत्यृचः वसिष्ठः ऋषिः। उषा देवता। साम्नः उषःसाम्नश्च उषा ऋषिः ॥ (ग्रा. गे. ५१६) ॥ ३०३ ॥

इमा उ वाम् (२) इत्यृचो वसिष्ठः ऋषिः। अश्विनौ देवता। अश्विनो साम्नश्च अश्विनावेव ऋषी ॥ (ग्रा. गे. ५१७) ॥ ३०४ ॥

---

2. L. वाङस्य for वार्शस्य वार्शः
7. Sm. शुनुष्टिगुः काण्वः for बालखिल्याः
10 MyLB. अजिगीर्तस्य अजिगीर्तः (L° र्तिः) for आजीगर्तस्य अजीगर्तिः
17. MyBL. वा for वाम्.

**[कुष्ठः को वाम्** (३) इत्यृचः अश्विनावृषी। अश्विनौ देवता। साम्नः अश्विनोः संयोजनस्य साम्नश्च अश्विनौ ऋषी॥ (आ. गे. ५१८) ॥ ६०५ ॥

**अयं वां मधुमत्तमः** (४) इत्यृचः प्रस्कण्वः काण्वः ऋषिः। अश्विनोः साम्नश्च अश्विनावेव ऋषी। [(आ. गे. ५१९) ॥ ३०६ ॥]

**आ त्वा सोमस्य गल्दया** (५) इत्यृचः मेधातिथि–मेध्यातिथी ऋषी। साम्नः सोमसाम्नः सोम ऋषिः॥ (आ. गे. ५२०) ॥ ३०७ ॥

**अध्वर्यो द्रावया त्वम्** (६) इत्यृचः देवातिथिः ऋषिः। साम्नः आजमायवस्य अजमायुः ऋषिः॥ (आ. गे. ५२१) ॥ ३०८ ॥

**अभीषतस्तद्** (७) इत्यृचः वसिष्ठः ऋषिः। साम्नः प्रैयमेधस्य प्रियमेधा ऋषिः॥ (आ. गे. ५२२) ॥ ३०९ ॥

**यदिन्द्र यावतस्त्वम्** (८) इत्यृचः वसिष्ठः ऋषिः। साम्नोरिन्द्रस्य वैरूपयोः विरूपः ऋषिः। वसिष्ठो वा॥ (आ. गे. ५२३-४) ॥ ३१० ॥

**त्वमिन्द्र प्रतूर्तिषु** (९) इत्यृचः नृमेधा ऋषिः। साम्नो वैश्वदेवस्य विश्वेदेवा ऋषयः॥ (आ. गे. ५२५) ॥ ३११ ॥

**प्र यो रिरिक्ष ओजसा** (१०) इत्यृचः नोधा ऋषिः। साम्नः आथर्वणस्य अथर्वा ऋषिः॥ (आ. गे. ५२६) ॥ ३१२ ॥

॥ इत्यैन्द्रे तृतीयेऽध्याये अष्टमः खण्डः॥
॥ [इति] बृहत्योऽशीतयः (!) ॥

---

1. MyBL. Om: कुष्ठः कोवाम् ...अश्विनावेव ऋषी. L. 5; See CN.
6. MyBL: प्रस्कण्व ऋषिः for मेधातिथिमेध्यातिथी ऋषी. See CN.
20. आशीतयः See CN.

॥ नवमः खण्डः ॥

## ॥ अथ त्रैष्टुभः ॥

असावि देवम् (१) इत्यृचः वसिष्ठः ऋषिः। साम्नोराघस्य प्राकर्षस्य पृक्षः (प्रकर्षः?) ऋषिः। [द्वितीयस्य निह्नवस्य वसिष्ठः ऋषिः ॥ (आ. गे. ५२८) ॥ ३१३ ॥

योनिष्ट इन्द्र सदने (२) इत्यृचः वसिष्ठः ऋषिः। साम्नोर्योनिनोः गृत्समदः ऋषिः ॥ (आ. गे. ५२९-३०) ॥ ३१४ ॥

अदर्दरुत्समसृजः (३) इत्यृचः गातुरात्रेयः ऋषिः। औरुक्षययोः साम्नोः उरुक्षयः ऋषिः ॥ (आ. गे. ५३१-२) ॥ ३१५ ॥]

सुष्वाणासः (४) इत्यृचः पृथुर्वैन्यः ऋषिः। साम्नोः पाक्ष(र्थ?)योः पृथुर्वैन्यः ऋषिः ॥ (आ. गे. ५३३-४) ॥ ३१६ ॥

जगृह्मा ते दक्षिणम् (५) इत्यृचः सप्तगुः [ऋषिः]। साम्नां पञ्चानामाद्ये सौपर्णे। तयोः सुपर्णः ऋषिः। त्रीणि वात्सप्राणि। [तयोः वत्सप्रः ऋषिः।] क्षुल्लकवात्सप्रं तृतीयम्। महावात्सप्रं पञ्चमम् ॥ (आ. गे. ५३५–९) ॥ ३१७ ॥

इन्द्रं नरो ने[मधिता] (६) इत्यृचः वसिष्ठः ऋषिः। साम्नो गौरीवितस्य गौरीवितिः ऋषिः ॥ (आ. गे. ५४०) ॥ ३१८ ॥

वयः सुपर्णा (७) इत्यृचः गौरीवितिः ऋषिः। साम्नो वैदन्वतस्य विदन्वान् भार्गवः ऋषिः ॥ (आ. गे. ५४१) ॥ ३१९ ॥

नाके सुपर्णम् (८) इत्यृचः वेनो भार्गवः ऋषिः। साम्नो महायामस्य यमः ऋषिः ॥ (आ. गे. ५४२) ॥ ३२० ॥

---

4. B My L. om. द्वितीयस्य....उरुक्षयः ऋषिः L. 9; See CN.

12. MyB. सप्तउः, L: सप्तमः for सप्तगुः

17. MyBL. गौरीवितः for गौरीवितिः See CN.

ब्रह्म जज्ञानम् (९) इत्यृचः वामदेवः [ऋषिः ।] साम्नो[म्नी ?] ऋतोः सामनी द्वे । [तयोः] ऋतुः ऋषिः ॥ (ग्रा. गे. ५४३-४)॥ ३२१ ॥

अपूर्व्या पुरुतमानि ॥ (१०) इत्यृचः सुहोत्रो भरद्वाजः ऋषिः । साम्नः इन्द्रस्य वारवन्तीयस्य इन्द्रः ऋषिः ॥ (ग्रा. गे. ५४५) ॥ ३२२ ॥

॥ इत्यैन्द्रे तृतीयेऽध्याये नवमः खण्डः ॥

---

॥ दशमः खण्डः ॥

अव द्रप्सः (१) इत्यृचः द्युतानः ऋषिः । साम्नां चतुर्णाम् आद्ययोः इन्द्रस्य क्षुरपविणी । तयोरिन्द्रः ऋषिः । सौमरश्मे द्वे । तयोरिन्द्रः ऋषिः ॥ (ग्रा. गे. ५४६-९) ॥ ३२३ ॥

वृत्रस्य त्वा श्वसथ (२) इत्यृचः द्युतानः ऋषिः । साम्नोः द्युतानस्य मारुतस्य साम्नोर्द्युतानः ऋषिः ॥ (ग्रा. गे. ५५०–१) ॥ ३२४ ॥

विधुं दद्राणम् (३) इत्यृचः बृहदुक्थः ऋषिः । साम्नोः सोमसाम्नोः सोमः ऋषिः ॥ (ग्रा. गे. ५५२-३) ॥ ३२५ ॥

त्वं ह त्यत् (४) इत्यृचः द्युतानः ऋषिः । साम्नोरिन्द्रवज्रयोः इन्द्रः ऋषिः ॥ (ग्रा. गे. ५५४-५) ॥ ३२६ ॥

मोर्डि न त्वा (५) इत्यृचः वामदेवः ऋषिः । साम्नोर्भृष्टिमतोः सूर्यवर्चसोर्भृष्टिमान् सूर्यवर्चाः ऋषिः ॥ (ग्रा. गे. ५५६-७) ॥ ३२७ ॥

प्र वो महे (६) इत्यृचः वसिष्ठः ऋषिः । साम्नोर्वसिष्ठस्याङ्कुशयोर्वसिष्ठः ऋषिः ॥ (ग्रा. गे. ५५८-९) ॥ ३२८ ॥

---

1. Sm. बृहस्पतिर्नकुलो वा for वामदेवः
2. MyBL. ऋतः for ऋतोः, MyL. B. ऋतः for ऋतुः
8. Sm. स्यौम ' for सौम°.

शुनं हुवेम (७) इत्यृचः विश्वामित्रः ऋषिः। साम्नो भारद्वाजस्य भरद्वाजः ऋषिः ॥ (ग्रा. गे. ५६०) ॥ ३२९ ॥

उदु ब्रह्माणि (८) विश्वामित्रः ऋषिः। साम्नो वैश्वदेवस्य विश्वेदेवा ऋषयः ॥ (ग्रा. गे. ५६१) ॥ ३३० ॥

चक्रं यदस्य (९) इत्यृचः गौरीवितिः ऋषिः। साम्नः आथर्वणस्य अथर्वा ऋषिः ॥ (ग्रा. गे. ५६२) ॥ ३३१ ॥

॥ इत्यै तृतीयेऽध्याये दशमः खण्डः ॥

॥ एकादशः खण्डः ॥

त्यमू षु वाजिनम् (१) इत्यृचः तार्क्ष्यपुत्रो अरिष्टनेमिः ऋषिः। साम्नोः तार्क्ष्यसाम्नोः तार्क्ष्यः ऋषिः ॥ (ग्रा. गे. ५६३-४) ॥ ३३२ ॥

त्रातारमिन्द्रम् (२) इत्यृचः भरद्वाजः ऋषिः। साम्नः इन्द्रस्य त्रातस्य इन्द्रः ऋषिः ॥ (ग्रा. गे. ५६५) ॥ ३३३ ॥

यजामहे (३) इत्यृचः वसुकृदृषिः। विमदो वा ऋषिः। साम्नो वार्त्रतुरस्य वृत्रतुरो ऋषिः। यज्ञतुरो वा ॥ (ग्रा. गे. ५६६) ॥ ३३४ ॥

सत्राहणम् (४) इत्यृचः वामदेवः ऋषिः। साम्नोर्ध्रुवतो मारुतस्य साम्नोः ध्रुवन्मारुतः ऋषिः ॥ (ग्रा. गे. ५६७-८) ॥ ३३५ ॥

यो नो वनुष्यन् (५) इत्यृचः वामदेवः ऋषिः। साम्न आग्नस्य अग्निः ऋषिः ॥ (ग्रा. गे. ५६९) ॥ ३३६ ॥

---

9. BMy. वाजिनः for वाजिनम् ; B My om. इत्यृचः

12. Sm. तातस्य for त्रातस्य

यं वृत्रेषु (६) इत्यृचः वामदेवः ऋषिः। साम्नोर्गात्समदयोः गृत्समदः ऋषिः॥ (ग्रा. गे. ५७०-१)॥ ३३७॥

इन्द्रापर्वता (७) इत्यृचः विश्वामित्रः [ऋषिः।] साम्नो वैश्वामित्रस्य विश्वामित्रः ऋषिः॥ (ग्रा. गे. ५७२)॥ ३३८॥

इन्द्राय गिरः (८) इत्यृचः रेणुर्वैश्वामित्रः ऋषिः। साम्नां सावित्राणां षण्णां सविता ऋषिः। हा हा [इ] इत्यादिपञ्चभिस्तोमैः प्रतिस्तोभमाचिकचतुष्टयोपेतैः पञ्च सावित्राणि॥ (ग्रा. गे. ५७३)॥ ३३९॥

आ त्वा सखायः (९) इत्यृचः वामदेवः ऋषिः। साम्नः कुतीपादस्य वैरूपस्य विरूपः ऋषिः॥ (ग्रा. गे. ५७४)॥ ३४०॥

को अद्य युङ्क्ते (१०) इत्यृचः गौतमः ऋषिः। साम्नः आमहीयवस्य आमहीयुः ऋषिः॥ (ग्रा. गे. ५७५)॥ ३४१॥

॥ इत्यैन्द्रे तृतीयेऽध्याये एकादशः खण्डः॥

[इति त्रिष्टुभः]

---

॥ द्वादशः खण्डः॥

गायन्ति त्वा इति दश[ानुष्टु]भ्यो ऋचः। इन्द्रो देवता॥

गायन्ति त्वा गायत्रिणः (१) इत्यृचः [मधुच्छन्दा ऋषिः।] साम्नामाद्ये शौखण्डिने। तयोः शिखण्डी ऋषिः। तृतीयमुद्वंशीयम्। विश्वेदेवा ऋषयः॥ (ग्रा. गे. ५७८)॥ ३४२॥

---

1. BMy. L. गृत्समदयोः for गार्त्समदयोः

5. BMy L. इन्द्र या for इन्द्राय

**इन्द्रं विश्वा अवीवृधन्** (२) इत्यृचः जेता मधुच्छन्दा ऋषिः। साम्नां सप्तानामाद्यानि त्रीणि शैखण्डिनानि। तेषां शिखण्डी ऋषिः। द्वे आष्टादंष्ट्रे। तयोरष्टादंष्ट्रो वैरूपः ऋषिः। महावैश्वामित्रे द्वे। तयोर्विश्वामित्रः ऋषिः ॥ (आ. गे ५७९-५८५) ॥ ३४३ ॥

**इममिन्द्र सुतं पिब** (३) इत्यृचः गौतमः ऋषिः। साम्नां चतुर्णां वसिष्ठस्य प्रियाणां वसिष्ठः ऋषिः। द्वितीयं गौतमं वा। तस्य गौतमः ऋषिः॥ (आ. गे. ५८६-८) ॥ ३४४ ॥

**यदिन्द्र चित्र म इह न** (४) इत्यृचः अत्रिः ऋषिः। सामानि चत्वारि वैङ्कानि। द्वयोर्गृत्समदः ऋषिः। तृतीयम् आकूपारं वा। तस्य आकूपाराङ्गिराः ऋषिः ॥ (आ. गे ५९०-३) ॥ ३४५ ॥

**श्रुधी हवं तिरश्च्या** (५) इत्यृचः तिरश्चाङ्गिरसः ऋषिः। साम्नोश्च तैरश्चयोः स एव ॥ (आ. गे. ५९४-५) ॥ ३४६ ॥

**असावि सोम इन्द्र ते** (६) इत्यृचः गौतमः ऋषिः। साम्नो वैश्वामित्रस्य विश्वामित्रः ऋषिः ॥ (आ. गे. ५९६) ॥ ३४७ ॥

**एन्द्र याहि** (७) इत्यृचः कण्वो नीपातिथिः ऋषिः। साम्नोः काण्वयोश्च स एव ॥ (आ. गे. ५९७-८) ॥ ३४८ ॥

**आ त्वा गिरो रथी** (८) इत्यृचः तिरश्चीः ऋषिः। साम्नो वैश्वामित्रस्य विश्वामित्र ऋषिः ॥ (आ. गे. ५९९) ॥ ३४९ ॥

**एतो न्विन्द्रं स्तवाम** (९) इत्यृचः तिरश्चीः ऋषिः। साम्नोः शुद्धाशुद्धीययोः इन्द्रः ऋषिः। वसिष्ठो [वा] ऋषिः ॥ (आ. गे. ६००-१) ॥ ३५० ॥

---

2. BMy L. साप्तानां for साम्नां
14. Sm. महावैश्वामित्रस्य for विश्वामित्रस्य
19. Sm. विश्वामित्रो गाथिनः for तिरश्चीः See CN.

**यो रयिं वो रयिम्** (१०) इत्यृचः शंयुर्बार्हस्पत्यः ऋषिः। साम्नो-रैषयोर्गौतमः ऋषिः॥ (ग्रा. गे. ६०२-३)॥ ३५१॥

॥ इत्यैन्द्रे तृतीयेऽध्याये द्वादशः खण्डः॥

॥ इति तृतीयोऽध्यायः॥

## ॥ चतुर्थोऽध्यायः ॥

### ॥ प्रथमः खण्डः ॥

अथैन्द्रे द्वयोरनुवाकयोरानुष्टुभ्यो ऋचः ॥

प्रत्यस्मै पिपीषते (१) इत्यृचः भरद्वाजः ऋषिः । साम्नां त्रयाणाम् आद्ये कौल्मलबर्हिषसामनी । तयोः कुल्मलबर्हिः ऋषिः । तृतीयं नानदम् । तस्य नदन्नाङ्गिरसः ऋषिः ॥ (ग्रा. गे. ६०४-६) ॥ ३५२ ॥

आ नो वयो वयःशयम् (२) इत्यृचः वामदेवः ऋषिः । साम्नः शाक[पूतस्य] श[ा]क[पूतिः] ऋषिः ॥ (ग्रा. गे. ६०७) ॥ ३५३ ॥

आ त्वा रथं यथोतये (३) इत्यृचः प्रियमेधा ऋषिः । साम्नोः कौल्मल[बर्हिषयोः] कुल्मलबर्हिः ऋषिः ॥ (ग्रा. गे. ६०८-९) ॥ ३५४ ॥

स पूर्व्यो महोनाम् (४) इत्यृचः प्रगाथः ऋषिः । साम्नो मधुश्च्युन्निधनस्य प्रजापतिः ऋषिः ॥ (ग्रा. गे. ६१०) ॥ ३५५ ॥

यदी वहन्त्याश[वः] (५) इत्यृचः श्यावाश्व आत्रेयः ऋषिः । मरुतो देवता । साम उषसः साम । तस्य उषा ऋषिः ॥ (ग्रा. गे. ६११) ॥ ३५६ ॥

[त्यमु वो अप्रहणम् (६) इत्यृचः शंयुर्बार्हस्पत्यः ऋषिः । साम्नः भारद्वाजस्य भरद्वाजः ऋषिः ॥ (ग्रा. गे. ६१२) ॥ ३५७ ॥

दधिक्राव्णो अकारिषम् (७) इत्यृचः वामदेवः ऋषिः । साम्नः दधिक्राव्णस्य दधिक्रा ऋषिः ॥ (ग्रा. गे. ६१३) ॥ ३५८ ॥

---

3. BMy L. अनु° for आनु°.
6. BMy. नदन्नामगिरः for नदन्नाङ्गिरसः

**पुरां भिन्दुः** (८) इत्यृचः जेता [माधुच्छन्दसः] ऋषिः। साम्नो माधुच्छन्दसस्य मधुच्छन्दा ऋषिः ॥ (ग्रा. गे. ६१४) ॥ ३५९ ॥

॥ इत्यैन्द्रे चतुर्थेऽध्याये प्रथमः खण्डः ॥ १ ॥

॥ द्वितीयः खण्डः ॥

**प्रप्र वस्त्रिष्टुभमिषम्** (१) इत्यृचः प्रियमेधा ऋषिः। साम्नो वामदेव्यस्य वामदेवः ऋषिः ॥ (ग्रा. गे. ६१५) ॥ ३६० ॥

**कश्यपस्य** (२) इत्यृचः वामदेवः ऋषिः। इन्द्राणी देवता। साम्नश्च काश्यपस्य कश्यपः ऋषिः ॥ (ग्रा. गे. ६१६) ॥ ३६१ ॥

**अर्चत प्रार्चता** (३) इत्यृचः प्रियमेधा ऋषिः। मित्रावरुणौ देवता। साम्नः प्रैयमेधस्य प्रियमेधा ऋषिः ॥ (ग्रा. गे. ६१७) ॥ ३६२ ॥

**उक्थमिन्द्राय शंस्यम्** (४) इत्यृचः मधुच्छन्दा ऋषिः। मित्रावरुणौ देवते। साम्नो बार्हदुक्थस्य बृहदुक्थः ऋषिः ॥ (ग्रा. गे. ६१८) ॥३६३॥

**विश्वानरस्य वस्पतिम्** (५) इत्यृचः प्रियमेधा ऋषिः। साम्नोऽग्नेर्वैश्वानरयोः अग्निर्वैश्वानरः ऋषिः ॥ (ग्रा. गे. ६१९-२०) ॥ ३६४ ॥

**स घा यस्ते दिवो नरः** (६) इत्यृचः भरद्वाजः ऋषिः। साम्नोः शाकपूतयोः शाकपूतिः ऋषिः ॥ (ग्रा. गे. ६२१-२) ॥ ३६५ ॥

**विभोष्ट इन्द्र** (७) इत्यृचः अत्रिः ऋषिः। साम्नो वरुणान्याः साम्नः वरुणानी ऋषिः ॥ (ग्रा. गे. ६२३) ॥ ३६६ ॥

**वयश्चित्ते पतत्रिणः** (८) इत्यृचः प्रस्कण्वः ऋषिः। उषा देवता। साम्नः औषसस्य उषा ऋषिः ॥ (ग्रा. गे. ६२४) ॥ ३६७ ॥

---

7. इन्द्राणी See CN.
11. वरुणौ See CN.
15. MyBL. सखा for स घा.
16. MyLB. शुकभूतः for शाकभूतिः See CN.

**अमी ये देवा स्थन** (९) इत्यृचः आप्त्य(प्त्य ?)स्त्रितः ऋषिः। [विश्वे]देवा देवताः। साम्नो रोचनस्य रुचिः ऋषिः ॥ (ग्रा. गे. ६२५) ॥ ३६८ ॥

**ऋचं साम** (१०) इत्यृचः वामदेवः ऋषिः। साम्नो (!) पूर्वमृचः साम। तस्य ऋगेव ऋषिः। उत्तरं साम्नः साम। तस्य सामैव ऋषिः। ऋक्सामनी देवते (ग्रा. गे. ६२६-७) ॥ ३६९ ॥

॥ इत्यष्टादशानुष्टुभ्यः ऋचः ॥

॥ इत्यैन्द्रे चतुर्थेऽध्याये द्वितीयः खण्डः ॥ २ ॥

---

## ॥ तृतीयः खण्डः ॥

अथ जगत्यः एकादशर्चः। आद्या अतिजगतीति केचित् ॥

**विश्वाः पृतना** (१) इत्यृचः रेभः काश्यपः ऋषिः। साम्नस्त्रैशोकस्य त्रिशोकः ऋषिः ॥ (ग्रा. गे. ६२८) ॥ ३७० ॥

**श्रत्ते दधामि** (२) इत्यृचः सुवेदाः शैलूषी ऋषिः। साम्नामष्टानामाद्ये द्वे शैखण्डिने। तयोः शिखण्डी ऋषिः। तृतीयचतुर्थौ अत्रेर्विवर्तौ। तयोरत्रिः ऋषिः। पञ्चमषष्ठे महासावेतसे। तयोश्चात्रिः ऋषिः। सप्तमाष्टमे महाशैरीषे। तयोर्महान् शिरीषः ऋषिः ॥ (ग्रा. गे. ६२९-३६) ॥ ३७१ ॥

**समेत विश्व ओजसा** (३) इत्यृचः वामदेवो गौतमः ऋषिः। साम्नामिन्द्रस्य प्रियाणां त्रयाणाम् इन्द्रः ऋषिः। वसिष्ठो वा ॥ (ग्रा. गे. ६३९) ॥ ३७२ ॥

---

1. My LB. स्थानाम् for स्थन
3. My LB. देवामवा See CN.
13. MyLB. सुवेंदाः for सुवेदाः ; My शेष्ठयषी, B. शेप्ठूषी L. शेषूषी for शैलूषी.
15. Sm. सचेतसः for अत्रिः
18. My LB. सचेदाः शेपूरः for वामदेवो गौतमः See CN.

**इमे त इन्द्र ते** (४) इत्यृचः सव्य आङ्गिरसः ऋषिः। साम्नामिन्द्रस्य वसिष्ठस्य वा वैरूपाणां त्रयाणाम् इन्द्रः वसिष्ठो वा ऋषिः ॥ (ग्रा. गे. ६४०-२) ॥ ३७३ ॥

**चर्षणीधृतं मघवानम्** (५) इत्यृचः विश्वामित्रः [ऋषिः।] साम्नो बार्हदुक्थस्य बृहदुक्थः ऋषिः ॥ (ग्रा. गे. ६४३) ॥ ३७४ ॥

**अच्छा व इन्द्रं मतयः** (६) इत्यृचः कृष्णः ऋषिः। साम्नोश्च त्रासदस्यवयोः त्रसदस्युः ऋषिः ॥ (ग्रा. गे. ६४४-५) ॥ ३७५ ॥

**अभि त्यं मेषम्** (७) इत्यृचः सव्यः ऋषिः। साम्नः जागतसोमसाम्नः सोमः ऋषिः ॥ (ग्रा. गे. ६४६) ॥ ३७६ ॥

**त्यं सु मेषं महया स्वर्विदम्** (८) इत्यृचः सव्यः ऋषिः। साम्नः सौभरस्य सुभरिः ऋषिः ॥ (ग्रा. गे. ६४७) ॥ ३७७ ॥

**घृतवती भुवनानाम्** (९) इत्यृचः भरद्वाजः ऋषिः। द्यावापृथिव्यौ देवते। साम्नोर्वरुणस्य साम्नोर्वरुणः ऋषिः ॥ (ग्रा. गे. ६४८-९) ॥ ३७८ ॥

**उभे यदिन्द्र रोदसी** (१०) इत्यृचः मरुतो यौवनाश्वः ऋषिः। इयमष्टाक्षरपदा महापङ्क्तिश्छन्दस्का। साम्नः श्येनस्य इन्द्रः ऋषिः ॥ (ग्रा. गे. ६५०) ॥ ३७९ ॥

**प्र मन्दिने पितुमदर्चता वचः** (११) इत्यृचः कुत्स ऋषिः। एषा गर्भस्राविणी उपनिषत्। साम्नः च्यावनस्य च्यवनः ऋषिः ॥ (ग्रा. गे. ६५१) ॥ ३८० ॥

॥ इति जगत्यः ॥

॥ इत्यैन्द्रे तृतीयेऽध्याये तृतीयः खण्डः ॥

---

6. My BL. साम्नश्छत्रास° for साम्नोश्च त्रास° ;
7. My LB. छत्रास for त्रस°.
15. My. श्यैन्यस्य for श्येनस्य
23. L. after ऋषिः। adds गर्भस्रावः

## ॥ चतुर्थः खण्डः ॥

### अथ इन्द्रपुच्छम्

अष्टाविंशतिरिन्द्रेति मुख्याः सप्तदशोष्णिहः ।
दशान्याः ककुभो मध्ये पिबेति त्रिपदां विराट् ॥ १ ॥
तुचे तुनायापामीवामादित्यानां तु संस्तवः ।
आ गन्ता [गा]त्रो मारुत्यो वैन्द्रया एवापरा ऋचः ॥ २ ॥

इन्द्र सुतेषु (१) इत्यृचः नारदः ऋषिः । साम्नां त्रयाणाम् आद्यं कोशम् । द्वितीयमनुक्रोशम् । तृतीयं कौत्सम् । संकोशानुकोशयोः इन्द्रः ऋषिः । कौत्सस्य कुत्सः ऋषिः ॥ (ग्रा. गे. ६५२-४) ॥ ३८१ ॥

तमु अभि प्र गायत (२) इत्यृचः तं ते मदम् (३) इत्यृचश्च गौषूक्ति-अश्वसूक्तिनावृषी । तमु आभीति साम्नां चतुर्णाम् आद्ये दैवोदासे । तयोर्दिवोदासः ऋषिः । प्रहितोः संयोजने द्वे । ओकोनिधनं पूर्वम् । प्रहितिः ऋषिः । तं ते मदमिति साम्नां चतुर्णां हारिवर्णानां हरिवर्णः आङ्गिरसः ऋषिः ॥ (ग्रा. गे. ६५५-६२) ॥ ३८१-३ ॥

यत् सोममिन्द्र (४) इत्यृचः पर्वतः ऋषिः । साम्नां चतुर्णां त्रैतानां त्रित ऋषिः ॥ (ग्रा. गे. ६६३-६) ३८४ ॥

[एदुम]धोर्मदिन्तरम् (५) इत्यृचः विश्वमनाः वैयश्वः ऋषिः । साम्नो[ः सुराधसप्राधसयोः] सुराध[स] प्राध[स]वाङ्गिरसावृषी ॥ (ग्रा. गे. ६६७-८) ॥ ३८५ ॥

एन्दुमिन्द्राय सिञ्चत (६) इत्यृचः विश्वमनाः वैयश्वः ऋषिः । साम्नो मारुतस्य मरुतः ऋषिः ॥ (ग्रा. गे. ६६९) ॥ ३८६ ॥

---

10. My B. तमुवभि L. तमु अभि for तमू अभि. See CN, My LB. after ऋचश्च add अस्य
15. MyLB. त्रैतानां सूतः for त्रैतानां त्रितः ।
21. My LB. सुराधप्राधावङ्गिरसा साङ्गिरसौ for सुराधस त्रितः साङ्गिरसौ

**एतो न्विन्द्रं स्तवाम** (७) इत्यृचः विश्वमनाः वैयश्वः ऋषिः । साम्नो वैश्वमनसस्य विश्वमनाः ऋषिः ॥ (ग्रा. गे. ६७०) ॥ ३८७ ॥

**इन्द्राय साम गायत** (८) इत्यृचः नृमेधः ऋषिः । साम्नां सौमित्राणां त्रयाणां सुमित्रः ऋषिः ॥ (ग्रा. गे. ६७२-३) ॥ ३८८ ॥

**य एक इद्विदयते** (९) इत्यृचः गौतमः ऋषिः । साम्नां त्रयाणां त्रैककुभानां त्रिककुभः ऋषिः ॥ (ग्रा. गे. ६७४-६) ॥ ३८९ ॥

**सखाय आ शिषा**[महे] (१०) इत्यृचः विश्वमनाः ऋषिः । साम्नामौक्ष्णोरन्ध्राणाम् उक्ष्णोरन्ध्रः ऋषिः (ग्रा. गे. ६७७-९) ॥ ३९० ॥

॥ इत्यैन्द्रे चतुर्थेऽध्याये औष्णिहश्चतुर्थः खण्डः ॥

## ॥ पञ्चमः खण्डः ॥

**गृणे तदिन्द्र ते शवः** (१) इत्यृचः प्रगाथः ऋषिः । साम्नां त्रयाणाम् आद्यं प्रयस्वत् प्राजापत्यम् । द्वितीयम् आक्षारम् । तृतीयं [प्रयस्वत् ।] तेषां प्रजापतिः ऋषिः ॥ (ग्रा. गे. ६८०-२) ॥ ३९१ ॥

**यस्य त्यच्छम्**[बरम्] इत्यृचः (२) भरद्वाजः ऋषिः । साम्नां चतुर्णां दैवोदासानां दिवोदासः ऋषिः ॥ (ग्रा. गे. ६८३-६) ॥ ३९२ ॥

**एन्द्र नो गधि** (३) इत्यृचः नृमेधः ऋषि । साम्नोः सांवर्तयोः इन्द्रः ऋषिः ॥ (ग्रा. गे. ६८७-८) ॥ ३९३ ॥

**य इन्द्र सोम** (४) इत्यृचः पर्वतः ऋषिः । साम्नः साम्न आक्षारस्य अक्षारः ऋषिः ॥ (ग्रा. गे. ६८९) ॥ ३९४ ॥

**तुचे तुनाय तत्सु नः** (५) इत्यृचः इरिमीढः ऋषिः । आदित्यो देवता । साम्नः दीर्घायुष्यस्य प्रजापतिः ऋषिः ॥ (ग्रा. गे. ६९०) ॥ ३९५ ॥

**वेत्था हि निर्ऋतीनाम्** (६) इत्यृचः विश्वमनाः ऋषिः। साम भरद्वाजस्य शुन्ध्युः [साम।] तस्य भरद्वाजः ऋषिः॥ (आ. गे. ६९१) ॥ ३९६ ॥

**अपामीवाम्** (७) इत्यृचः इरिमीढः ऋषिः। साम्नः अपामीवस्य आदित्य एव ऋषिः देवता च॥ (आ. गे. ६९२)॥ ३९७॥

**पिबा सोमम् इन्द्र** (८) इत्यृचः वसिष्ठः ऋषिः। त्रिपदा विराड् छन्दः। साम्नोः सहोदीर्घतमसयोः दीर्घतमा ऋषिः॥ (आ. गे. ६९३-४) ॥ ३९८ ॥

॥ इत्यौष्णिहः अष्टादशयः॥

॥ इत्यैन्द्रे चतुर्थेऽध्याये पञ्चमः खण्डः॥

## ॥ षष्ठः खण्डः ॥

अथ ककुभ्यः॥

**अभ्रातृव्यो अना त्वम्** (१) इत्यृचः सौभरिः ऋषिः। साम्नो अभ्रातृव्यस्य इन्द्रः ऋषिः॥ (आ. गे. ६९५)॥ ३९९॥

**यो न इदम्** (२) इत्यृचः सौभरिः ऋषिः। साम्नोः शार्करयोः शर्करः ऋषिः॥ (आ. गे. ६९६-७)॥ ४००॥

**आ गन्ता मा रिषण्यत** (३) इत्यृचः सौभरिः ऋषिः। साम्नो बृहत्कस्य बृहत्कः ऋषिः॥ (आ. गे. ६९८)॥ ४०१॥

**आ याह्ययम्** (४) इत्यृचः सौभरिः ऋषिः। साम्नां त्रयाणां सौयवसानां सुयवासुः ऋषिः॥ (आ. गे. ६९९-७०१)॥ ४०२॥

---

1. MyLB. after ऋषिः add. साम्नो

त्वया ह स्विद्युजा (५) इत्यृचः सौभरिः ऋषिः। साम्नो मरुतां धेनु[षाम्-]नः मरुतः ऋषिः॥ (आ. गे ७०२)॥ ४०३॥

गावश्चिद् घा समन्यवः (६) इत्यृचः सौभरिः ऋषिः। साम्नो मरुतां संवेशनीयस्य मरुतो ऋषिः॥ (आ. गे. ७०३)॥ ४०४॥

त्वं न इन्द्र (७) इत्यृचः नृमेधा ऋषिः। साम्नोरिन्द्रस्याभरयोरिन्द्रः ऋषिः॥ (आ. गे. ७०४-५)॥ ४०५॥

अधा हीन्द्र गिर्वणः (८) इत्यृचः नृमेधा ऋषिः। साम्नां वायोरैषिराणां त्रयाणां वायुः ऋषिः॥ (आ. गे. ७०६-८)॥ ४०६॥

सीदन्तस्ते वयः (९) इत्यृचः सौभरिः ऋषिः। साम्नोः सीदन्तीययोः प्रजापतिः ऋषिः॥ (आ. गे. ७०९-१०)॥ ४०७॥

वयमु त्वामपूर्व्यं (१०) इत्यृचः सौभरिः ऋषिः। सौभरसाम्नोः सौभरिः ऋषिः॥ (आ. गे. ७११-२)॥ ४०८॥

॥ इति ककुभ्यो दशार्चः॥

॥ इत्यैन्द्रे चतुर्थेऽध्याये षष्ठः खण्डः॥

---

## सप्तमः खण्डः

पङ्क्तयः सप्तदशर्चः॥

स्वादोरित्था विषूवतः (१) इत्यृचः गौतमः ऋषिः। साम्नो यामस्य यमः ऋषिः॥ (आ. गे. ७१३)॥ ४०९॥

इत्था हि सोम इन्मदः (२) इत्यृचः गौतमः ऋषिः। साम्नोर्गृत्स[मदस्य] मदयोः गृत्समदः ऋषिः॥ (आ. गे. ७१४-५)॥ ४१०॥

इन्द्रो मदाय (३) इत्यृचः गौतमः ऋषिः। साम्नां सप्तानामाद्ययोराभीकयोः अभीकः ऋषिः। तृतीयचतुर्थयोराभीशवयोरभीशुः ऋषिः। परेषां त्रयाणां बार्हद्गिराणां बृहद्गिरिः ऋषिः॥ (आ. गे. ७१६-७२२)॥ ४११॥

इन्द्र तुभ्यम् (४) इत्यृचः गौतमः ऋषिः। साम्नः इन्द्रस्वाराज्यस्य इन्द्रः ऋषिः॥ (आ. गे. ७२३)॥ ४१२॥

प्रेह्यभीहि (५) इत्यृचः गौतमः ऋषिः। साम्नः कश्यपस्य धृष्णुनः कश्यपः ऋषिः। (आ. गे. ७२४)॥ ४१३॥

यदुदीरित आजयः (६) इत्यृचः गौतमः ऋषिः। साम्नो मरुतां संवेशीयस्य मरुतः ऋषिः॥ (आ. गे. ७२५)॥ ४१४॥

अक्षन्नमीमदन्त (७) इत्यृचः गौतमः ऋषिः। साम्नो यमस्य यमः ऋषिः, (आ. गे. ७२६)॥ ४१५॥

उपो षु शृणुही गिरः (८) इत्यृचः गौतमः ऋषिः। साम्नो यामस्य यमः ऋषिः॥ (आ. गे. ७२७)॥ ४१६॥

चन्द्रमा अप्स्वन्तरा (९) इत्यृचः त्रितः ऋषिः। साम्नां पञ्चानामादितस्त्रयाणां त्रैतानां त्रितः ऋषिः। परयोः सौपर्णयोः सुपर्णः ऋषिः॥ (आ. गे. ७२८-३२)॥ ४१७॥

प्रति प्रियतमं रथम् (१०) [इत्यृचः] अवस्युः ऋषिः। साम्नो-लौशस्य लुशः ऋषिः॥ (आ. गे. ७३३)॥ ४१८॥

॥ इत्यैन्द्रे चतुर्थेऽध्याये सप्तमः खण्डः॥

---

6. My B. घृष्णुनः for धृष्णुनः

7. My after ऋषिः adds :—यामं वा सांयमः ऋषिः ;

## ॥ अष्टमः खण्डः ॥

**आ ते अग्न इधीमहि** (१) इत्यृचः [वसुश्रुत: आत्रेयः ऋषिः ।] अग्निर्देवता । तत्साम्नोः इन्द्रस्य संजययोरिन्द्रः [ऋषिः] ॥ (ग्रा. गे. ७३४-५) ॥ ४१९ ॥

**अग्निं न स्ववृक्तिभिः** (२) इत्यृचः गौतमः ऋषिः । पङ्क्तिः छन्दः । अग्निर्देवता । सामनी उत्सेधनिषेधौ । तयोरङ्गिरा ऋषिः (ग्रा. गे. ७३६-७) ॥ ४२० ॥

**मह्नो नो अद्य बोधय** (३) इत्यृचः गौतमः ऋषिः । पङ्क्तिः छन्दः । अग्निर्देवता । साम्नो वार्य्यस्य सत्यश्रव[स]ः वारीयः ऋषिः ॥ (ग्रा. गे. ७३८) ॥ ४२१ ॥

**भद्रं नो अपि वातय** (४) इत्यृचः गौतमः ऋषिः । पङ्क्तिः छन्दः । सोमो देवता । साम्नः पौषस्य पूषा ऋषिः ॥ (ग्रा. गे. ७३९) ॥ ४२२ ॥

**क्रत्वा महान्** (५) इत्यृचः गौतमः ऋषिः । पङ्क्तिः छन्दः । इन्द्रो देवता । साम्न औषस्य उषा ऋषिः ॥ (ग्रा. गे ७४०)॥ ४२३ ॥

**स घा तं वृषणम्** (६) इत्यृचः गौतमः ऋषिः । पङ्क्तिः छन्दः । इन्द्रो देवता । [लौशस्य साम्नः लुशः ऋषिः (ग्रा. गे. ७४१) ४२४ ॥]

[**अग्निं तं मन्ये** (७) इत्यृचः वसुश्रुतः आत्रेयः ऋषिः । पङ्क्तिः छन्दः । अग्निर्देवता । साम्नः निषेधसाम्नः अङ्गिरा ऋषिः ॥ (ग्रा. गे. ७४२) ॥ ४२५ ॥]

---

5. Sm. विमदः ऐन्द्रः for गौतमः

6. My BL, after अङ्गिरा ऋषिः । add अग्निर्देवता

9. L. वार्य्यस्य for वार्यस्य

11. My BL, अभि वादय for अपि वातय

[न तमंहो न (८) इत्यृचः अंहोमुग् वामदेव्यः ऋषिः। विश्वेदेवा देवताः।] उपरिष्टाद् बृहती छन्दः। साम्नो गौराङ्गिरसस्य गौरङ्गिराः ऋषिः॥ (ग्रा. गे. ७४३) ॥ ४२६ ॥

॥ इति पङ्क्तिच्छन्दः समाप्तम् ॥

॥ इत्यैन्द्रे चतुर्थेऽध्याये अष्टमः खण्डः ॥

## ॥ नवमः खण्डः ॥

अथ द्विपदा ऋचः त्रिंशत् ॥

परि प्र धन्व (१) इत्यृचः धिष्ण्योऽग्निः ऋषिः। अक्षरपङ्क्तिश्छन्दः। द्विपदा पङ्क्तिर्वा। सोमो देवता। साम्नां पञ्चानां सौहविषाणां सुहविराङ्गिरसः ऋषिः॥ (ग्रा. गे. ७४४-८) ॥ ४२७ ॥

पर्यू षु प्र धन्व (२) इत्यृचः त्र्यरुणः त्रसदस्युः ऋषिः। पिपीलिकामध्या त्रिपदानुष्टुप् छन्दः। सोमो देवता। साम्नां बाकानां त्रयाणां बकः ऋषिः॥ (ग्रा. गे. ७४९-७५१) ॥ ४२८ ॥

पवस्व सोम महान् (३) इत्यृचः धिष्ण्योऽग्नेयः ऋषिः। सोमो देवता। अक्षरपङ्क्तिश्छन्दः। द्विपदा पङ्क्तिर्वा। साम्नोर्धर्मिणोः प्रजापतिः ऋषिः। सोमो देवता॥ (ग्रा गे. ७५२-३) ॥ ४२९ ॥

पवस्व सोम महे दक्षाय (४) इत्यृचः धिष्ण्योऽग्नेयः ऋषिः। सोमो देवता। अक्षरपङ्क्तिश्छन्दः। द्विपदा पङ्क्तिर्वा। साम्नोर्विधर्मिणोः प्रजापतिः ऋषिः। सोमो देवता॥ (ग्रा. गे. ७५४-५) ॥ ४३० ॥

---

2. LB. गोराङ्गिरसस्य for गौराङ्गिरसस्य ; My LB. गौरिः for गौः
4. My B. om. इति पङ्क्तिच्छन्दः समाप्तम्
11. My सदस्य : B L. सदसस्युः for त्रसदस्युः

**इन्दुः पविष्ट चारुर्मदाय** (५) इत्यृचः विष्ण्योऽग्नेयः ऋषिः । सोमो देवता । द्विपदा पङ्क्तिश्छन्दः । साम्नो भागस्य भग ऋषिः ॥ (ग्र. गे. ७५६) ॥ ४३१ ॥

**अनु हि त्वा सुतं सोम** (६) इत्यृचः विष्ण्योऽग्नेयः ऋषिः । सोमो देवता । पिपीलिकामध्याऽनुष्टुप् छन्दः । साम्नो वाजिनां साम्नः वाजिनः ऋषयः । (आ. गे. ७५७) ॥ ४३२ ॥

**क ईं व्यक्ता नरः** (७) इत्यृचः वसिष्ठः ऋषिः । मरुतो देवता । द्विपदा पङ्क्तिः छन्दः । साम्नां त्रयाणां हिकनिकविकानां प्रजापतिः ऋषिः । मरुतो देवता ॥ (आ. गे. ७५८-७६०) ॥ ४३३ ॥

**अग्ने तमद्य** (८) इत्यृचः अग्निः ऋषिः । अग्निर्देवता । पदपङ्क्तिश्छन्दः पञ्चपदा । साम्नोरश्वयोर रूपः प्रजापतिः ऋषिः ॥ (आ. गे. ७६१-२) ॥ ४३४ ॥

**आविर्मर्या** (९) इत्यृचः वाजिनः ऋषिः । वाजिनो देवताः । पुरउष्णिक् छन्दः । साम्नो वाजिनां साम्नश्च वाजिन एव ऋषयः ॥ (आ. गे. ७६३) ॥ ४३५ ॥

**पवस्व सोम द्युम्नी सुधारः** (१०) इत्यृचः वामदेवः ऋषिः । सोमो देवता । द्विपदा पङ्क्तिः छन्दः । साम्नः आदित्यानां पवित्रस्य आदित्या ऋषयः ॥ (आ. गे. ७६४) ॥ ४३६ ॥

॥ इत्यैन्द्रे चतुर्थेऽध्याये द्विपदासु नवमः खण्डः ॥ ९ ॥

---

8. Sm. हिकविकनिकानां for हिकनिकविकानां
10. Sm. वामदेव ऋषिः for अग्नि ऋषिः
16. BMy L. सुधारय for सुधारः; Sm. अग्नेयो धिष्ण्यः for वामदेवः
19. BL. तृतीये for चतुर्थे.

## ॥ दशमः खण्डः ॥

विश्वतो दावन् (१) इत्यृचः वामदेवः ऋषिः। इन्द्रो देवता। द्विपदा विष्टारपङ्क्तिः छन्दः। सम्मोरिन्द्रस्याभारयोरिन्द्रः ऋषिः। वसिष्ठो वा ऋषिः॥ (ग्रा. गे. ७६५-६) ४३७॥

एष ब्रह्मा य ऋत्वियः (२) इत्यृचः वामदेवः ऋषिः। इन्द्रो देवता। द्विपदा गायत्री छन्दः। साम्नां पञ्चानामाद्ये द्वे वासुमन्दे। तयोर्वसुमन्दः ऋषिः। परेषां त्रयाणां कवषः ऋषिः॥ (ग्रा. गे. ७६७-७७१)॥ ४३८॥

ब्रह्माणमिन्द्रम् (३) इत्यृचः वामदेवः ऋषिः। इन्द्रो देवता। द्विपदा त्रिष्टुप् छन्दः। साम्नां त्रयाणां श्लोकानुश्लोकानां प्रजापतिः ऋषिः॥ (ग्रा. गे. ७७२-४)॥ ४३९॥

अनवस्ते रथम् (४) इत्यृचः वामदेवः ऋषिः। इन्द्रो देवता। द्विपदा त्रिष्टुप् छन्दः। साम्नः श्लोकस्य प्रजापतिः ऋषिः॥ (ग्रा. गे. ७७५)॥ ४४०॥

शं पदं मघम् (५) इत्यृचः वामदेवः ऋषिः। द्विपदा छन्दः। इन्द्रो देवता। साम्नो वाचः साम्नः वागृषिः॥ (ग्रा. गे. ७७६)॥ ४४१॥

सदा गावः (६) वामदेवः ऋषिः। द्विपदा विष्टारपङ्क्तिः छन्दः। इन्द्रो देवता। साम्नो वाचः साम्नः वागृषिः॥ ग्रा. गे. ७७७)॥ ४४२॥

आ याहि वनसा (७) इत्यृचः वामदेवः ऋषिः। उषा देवता। द्विपदा विष्टारपङ्क्तिः छन्दः। साम्नो मारुतस्य मरुतः ऋषिः॥ (ग्रा. गे. ७७८)॥ ४४३॥

---

2. Sm. त्रसदस्युः for वामदेवः See CN.
3. Sm. विराट् for विष्टारपङ्क्तिः See CN.
10. साम्नां त्रयाणाम् See CN.
13. BMy L. साम्नो for साम्नः
17. L. विषमपद for विष्टारपङ्क्तिः
18. Sm. विश्वे देवाः for इन्द्रः;

**उप प्रेक्ष मधुमति** (८) इत्यृचः वामदेवः [ऋषिः]। द्विपदा त्रिष्टुप् छन्दः। इन्द्रो देवता। साम्नो माधुच्छन्दसस्य मधुच्छन्दाः ऋषिः॥ (आ. गे. ७७९)॥ ४४४॥

**अर्चन्त्यर्कं मरुतः** (९) इत्यृचः वामदेवः [ऋषिः]। मरुतो देवता। द्विपदा त्रिष्टुप् छन्दः। साम्नो मारुतस्य मरुतः ऋषिः॥ (आ. गे. ७८०॥ ४४५॥

**प्र व इन्द्राय वृत्रहन्तमाय** (१०) इत्यृचः वामदेवः ऋषिः। विषमपदा द्विपदा छन्दः। इन्द्रो देवता। साम्नः उद्वंशपुत्रस्य प्रजापतिर्विश्वे देवा ऋषयः॥ आ. गे. ७८१)॥ ४४६॥

इत्यैन्द्रे चतुर्थेऽध्याये दशमः खण्डः॥ १०॥

---

## अथ एकादशः खण्डः

**अचेत्यग्निः** (१) इत्यृचः वामदेवः ऋषिः। अग्निर्देवता। द्विपदा गायत्री छन्दः। साम्नोर्धुरोः शाम्ययोः धुः ऋषिः॥ (आ. गे. ७८२-३)॥ ४४७॥

**अग्ने त्वं नो अन्तमः** (२) इत्यृचः बध्र्युर्गौपायनः ऋषिः। अग्निर्देवता। द्विपदा विष्टारपङ्क्तिः छन्दः। साम्नां चतुर्णाम् आद्यं गूर्दः। तस्य प्रजापतिः। द्वितीयमत्यर्दः। तस्य विश्वामित्रः। तृतीयमपि गूर्दः। तस्य प्रजापतिः। चतुर्थमत्यर्दः तस्य विश्वामित्रः॥ (आ. गे. ७८४-७)॥ ४४८॥

**भगो न चित्रः** (३) इत्यृचः वामदेवः [ऋषिः।] अग्निर्देवता। विषमपदा द्विपदा छन्दः। साम्नोः सान्तनिकयोः प्रजापतिः ऋषिः॥ (आ. गे. ७८८-९)॥ ४४९॥

---

12. Sm. पृषध्रः काण्वः for वामदेवः
15. Sm. बन्धुः गोपायनः for बध्र्युर्गौपायनः
17. L. गूर्दम् for गूर्दः
19. Sm. सुबन्धुः for वामदेवः

**विश्वस्य प्र स्तोभ** (४) इत्यृचः वामदेवः [ऋषिः]। इन्द्रो देवता। द्विपदा गायत्री छन्दः। साम्नोर्धनधर्मिणोः प्रजापतिः ऋषिः॥ (ग्रा. गे. ७९०-१)॥ ४५०॥

**उषा अप स्वसुः** (५) इत्यृचः संवर्तः ऋषिः। उषा देवता। द्विपदा विष्टारपङ्क्तिः छन्दः। साम्नः उषसः साम्नः उषा ऋषिः। उषा देवता॥ (ग्रा. गे. ७९२)॥ ४५१॥

**इमा नु कं भुवना** (६) इत्यृचः भौवनः ऋषिः। विश्वेदेवा देवता। द्विपदा विष्टारपङ्क्तिः छन्दः। साम्नः भारद्वाजस्य भरद्वाजः ऋषिः॥ (ग्रा. गे. ७९३)॥ ४५२॥

**विस्तुतयो यथा** (७) इत्यृचः वामदेवः [ऋषिः।] इन्द्रो (विश्वेदेवाः ?) देवता। द्विपदा गायत्री छन्दः। साम्नो रातेः इन्द्रः ऋषिः। विश्वेदेवा (इन्द्रो ?) देवता॥ (ग्रा. गे. ७९४)॥ ४५३॥

**अया वाजम्** (८) इत्यृचः भरद्वाजः ऋषिः। उषा (इन्द्रः ?) देवता। साम्नो भारद्वाजस्य भरद्वाजः ऋषिः॥ (ग्रा. गे. ७९५)॥ ४५४॥

**ऊर्जा मित्रः** (९) इत्यृचः वामदेवः ऋषिः। विश्वेदेवा देवता। द्विपदा त्रिष्टुप् छन्दः। साम्न ऐषस्य इषः ऋषिः॥ (ग्रा. गे. ७९६)॥ ४५५॥

---

1. MyBL. स्तोता for स्तोभ; Sm. श्रुतबन्धुः for वामदेवः
5. MyBL. after उषा देवता add द्विपदा विष्टारपङ्क्तिः छन्दः
10. Sm. कवष ऐलूषः for वामदेवः
13. MyB. Om. अया वजम् ......इष ऋषिः (L. 16.)
15. Sm. आत्रेयः for वामदेवः

**उप प्रेक्ष मधुमति** (८) इत्यृचः वामदेवः [ऋषिः]। द्विपदा त्रिष्टुप् छन्दः। इन्द्रो देवता। साम्नो माधुच्छन्दसस्य मधुच्छन्दाः ऋषिः॥ (ग्रा. गे. ७७९)॥ ४४४॥

**अर्चन्त्यर्कं मरुतः** (९) इत्यृचः वामदेवः [ऋषिः]। मरुतो देवता। द्विपदा त्रिष्टुप् छन्दः। साम्नो मारुतस्य मरुतः ऋषिः॥ (ग्रा. गे. ७८०॥ ४४५॥

**प्र व इन्द्राय वृत्रहन्तमाय** (१०) इत्यृचः वामदेवः ऋषिः। विषमपदा द्विपदा छन्दः। इन्द्रो देवता। साम्नः उर्वशपुत्रस्य प्रजापतिर्विश्वे देवा ऋषयः॥ ग्रा. गे. ७८१)॥ ४४६॥

इत्यैन्द्रे चतुर्थेऽध्याये दशमः खण्डः॥ १०॥

---

## अथ एकादशः खण्डः

**अचेत्यग्निः** (१) इत्यृचः वामदेवः ऋषिः। अग्निर्देवता। द्विपदा गायत्री छन्दः। साम्नोर्धुरोः शाम्ययोः धुः ऋषिः॥ (ग्रा. गे. ७८२-३)॥ ४४७॥

**अग्ने त्वं नो अन्तमः** (२) इत्यृचः बर्ध्दुर्गौपायनः ऋषिः। अग्निर्देवता। द्विपदा विष्टारपङ्क्तिः छन्दः। साम्नां चतुर्णाम् आद्यं गूर्दः। तस्य प्रजापतिः। द्वितीयमत्यर्दः। तस्य विश्वामित्रः। तृतीयमपि गूर्दः। तस्य प्रजापतिः। चतुर्थमत्यर्दः तस्य विश्वामित्रः॥ (ग्रा. गे. ७८४-७)॥ ४४८॥

**भगो न चित्रः** (३) इत्यृचः वामदेवः [ऋषिः।] अग्निर्देवता। विषमपदा द्विपदा छन्दः। साम्नोः सान्तनिकयोः प्रजापतिः ऋषिः॥ (ग्रा. गे. ७८८-९)॥ ४४९॥

---

12. Sm. पुरुध्रः काण्वः for वामदेवः
15. Sm. बन्धुः गोपायनः for बर्ध्दुर्गौपायनः
17. L: गूर्दम् for गूर्दः
19. Sm. सुबन्धुः for वामदेवः

**विश्वस्य प्र स्तोभ** (४) इत्यृचः वामदेवः [ऋषिः]। इन्द्रो देवता। द्विपदा गायत्री छन्दः। साम्नोर्धनधर्मिणोः प्रजापतिः ऋषिः॥ (ग्रा. गे. ७९०-१)॥ ४५०॥

**उषा अप पवस्व** (५) इत्यृचः संवर्तः ऋषिः। उषा देवता। द्विपदा विष्टारपङ्क्तिः छन्दः। साम्नः उषसः साम्नः उषा ऋषिः। उषा देवता॥ (ग्रा. गे. ७९२)॥ ४५१॥

**इमा नु कं भुवना** (६) इत्यृचः भौवनः ऋषिः। विश्वेदेवा देवता। द्विपदा विष्टारपङ्क्तिः छन्दः। साम्नः भारद्वाजस्य भरद्वाजः ऋषिः॥ (ग्रा. गे. ७९३)॥ ४५२॥

**विस्तुतयो यथा** (७) इत्यृचः वामदेवः [ऋषिः।] इन्द्रो (विश्वेदेवाः !) देवता। द्विपदा गायत्री छन्दः। साम्नो रातेः इन्द्रः ऋषिः। विश्वेदेवा (इन्द्रो !) देवता॥ (ग्रा. गे. ७९४)॥ ४५३॥

**अया वाजम्** (८) इत्यृचः भरद्वाजः ऋषिः। उषा (इन्द्रः !) देवता। साम्नो भारद्वाजस्य भरद्वाजः ऋषिः॥ (ग्रा. गे. ७९५)॥ ४५४॥

**ऊर्जा मित्रः** (९) इत्यृचः वामदेवः ऋषिः। विश्वेदेवा देवता। द्विपदा त्रिष्टुप् छन्दः। साम्न ऐषस्य इषः ऋषिः॥ (ग्रा. गे. ७९६)॥ ४५५॥

---

1. MyBL. स्तोता for स्तोभ; Sm. श्रुतबन्धुः for वामदेवः

5. MyBL. after उषा देवता add द्विपदा विष्टारपङ्क्तिः छन्दः

10. Sm. कवष ऐलूषः for वामदेवः

13. MyB. Om. अया वजम्......इष ऋषिः (L. 16.)

15. Sm. आत्रेयः for वामदेवः

**इन्द्रो विश्वस्य राजति** (१०) इत्यृचः वामदेवः ऋषिः। एकपदा गायत्री छन्दः। इन्द्रो देवता। सम्नोरिन्द्रस्य वैराजयोरिन्द्रः ऋषिः॥ (आ. गे. ७९७-८) ॥ ४५६ ॥

इति द्विपदा त्रिंशत्

॥ इत्यैन्द्रे चतुर्थेऽध्याये एकादशः खण्डः ॥ ११ ॥

---

## द्वादशः खण्डः

अथातिच्छन्दांसि दशार्चः ॥

**त्रिकद्रुकेषु महिषः** (१) इत्यृचः गृत्समदः ऋषिः। अष्टिः छन्दः। इन्द्रो देवता। साम्नो वाजिजितः प्रजापतिः [ऋषिः] ॥ (आ. गे. ७९९) ॥ ४५७ ॥

**अयं सहस्रमानवः** (२) इत्यृचः जगती छन्दः। सूर्यो देवता। साम्नोर्गौराङ्गिरसस्य साम्नोरङ्गिराः ऋषिः॥ (आ. गे. ८००-१) ॥४५८ ॥

**एन्द्र याह्युप नः** (३) इत्यृचः परुच्छेपः ऋषिः। अत्यष्टिः छन्दः। इन्द्रो देवता। साम्नः प्रवस्वतः प्राजापत्यस्य प्रजापतिः ऋषिः॥ (आ. गे. ८०२) ॥ ४५९ ॥

**तमिन्द्रं जोहवीमि** (४) इत्यृचः रेभः काश्यपः ऋषिः। इन्द्रो देवता। अतिजगती छन्दः। साम्नो अक्षय्यस्य प्रजापतिः ऋषिः॥ (आ. गे. ८०३) ॥ ४६० ॥

**अस्तु श्रौषट्** (५) इत्यृचः परुच्छेपः ऋषिः। अत्यष्टिः छन्दः। विश्वेदेवा देवता। साम्नो याज्ञतुरस्य यज्ञतुरः ऋषिः॥ (आ. गे. ८०४) ॥ ४६१ ॥

---

1. Sm. वसिष्ठो मैत्रावरुणः for वामदेवः

5. BL. तृतीये for चतुर्थे.

प्र वो महे मतयो यन्तु विष्णवे (६) इत्यृचः एवयामरुत् ऋषिः। रुद्रो देवता। अतिजगती छन्दः। साम्न एवयामरुतः साम्नः एवयामरुदृषिः॥ (ग्रा. गे. ८०५)॥ ४६२॥

अया रुचा हिरण्या (७) इत्यृचः परुच्छेपः ऋषिः। पवमानः सोमो देवता। अत्यष्टिः छन्दः। साम्नां त्रयाणां भरद्वाजस्य विषमाणां भरद्वाजः ऋषिः॥ (ग्रा. गे. ८०६-८)॥ ४६३॥

अभि त्यं देवं सवितारम् (८) इत्यृचः नकुलः ऋषिः। अतिशक्वरी छन्दः। सविता देवता। साम्नः सवितुः साम्नः सविता ऋषिः। देवता च॥ (ग्रा. गे. ८०९)॥ ४६४॥

अग्निं होतारं मन्ये दास्वन्तम् (९) इत्यृचः परुच्छेपः ऋषिः। अग्निर्देवता। अत्यष्टिः छन्दः। साम्नां चतुर्णामाद्ये भारद्वाजे पारुच्छेपे। तयोर्भरद्वाजः परुच्छेपो वा ऋषिः। उत्तरे अवभृथसामप्रवर्ग्यसामनी। तयोर्बृहस्पतिः ऋषिः। (ग्रा. गे. ८१०-१३)॥ ४६५॥

[तव त्यन्नर्यम् (१०) इत्यृचः गृत्समदः ऋषिः। इन्द्रः देवता। अष्टिः छन्दः। साम्न ऐषस्य इषः ऋषिः (ग्रा. गे. ८१४)॥ ४६६॥]

इत्यैन्द्रे चतुर्थेऽध्याये द्वादशः खण्डः॥ १२॥

शतानि त्रीण्यृचामैन्द्रे द्विपञ्चाशद्दशोऽधिकाः॥

इत्यैन्द्रमध्यायत्रयं समाप्तम्॥

---

1. BMy. एवयामरुद् for एवयामरुत्. See CN.
7. Sm. अत्यष्टिः for अतिशक्वरी.

## पञ्चमोऽध्यायः

### पावमानं काण्डम्

### प्रथमः खण्डः

**उच्चा त इति गायत्र्यः चत्वारिंशच्चतुर्युताः ।**
**सर्वासां पावमानीनां देवता सोम एव हि ॥**

देवताविशेषस्तत्र तत्र वक्ष्यते ॥

**उच्चा ते जातमन्धसः** (१) इत्यृचः आमहीयुः ऋषिः । गायत्री छन्दः । पवमानः सोमो देवता । सन्त्यत्र त्रयोदश सामानि । तत्राद्यमाजिगम् । द्वितीयमाभीकम् । आजीगस्य प्रजापतिः ऋषिः । आभीकस्य अङ्गिरसः ऋषयः । ऋषभः पावमानं तृतीयम् । औक्ष्णोरन्ध्रं वा । प्रजापतिः ऋषिः । उक्ष्णोरन्ध्रः काण्वो वा । चतुर्थमाभीकम् । तस्य अङ्गिरसः ऋषयः । पञ्चमषष्ठे बाभ्रवे वा । तयोर्बभ्रुः कौम्भ्यः ऋषिः । अष्टमनवमे शैशवे । तयोः शिशुराङ्गिरसः ऋषिः । दशमैकादशे प्रजापतेर्दोहादोहीये । तयोः प्रजापतिः ऋषिः । द्वादशमिन्द्राण्याः साम । तस्येन्द्राणी ऋषिः । त्रयोदशमामहीयवम् । तस्यामहीयुः ऋषिः ॥ (आ. गे. ८१५-२७) ॥ ४६७ ॥

**स्वदिष्ठया मदिष्ठया** (२) इत्यृचः मधुच्छन्दा ऋषिः । गायत्री छन्दः । पवमानः सोमो देवता । सन्त्यत्र नव सामानि । तत्राद्यमाजिगम् । तस्य आजिः ऋषिः । द्वितीयतृतीये सुरूपे । तयोः प्रजापतिः ऋषिः । चतुर्थपञ्चमे जमदग्नेः शिल्पे । तयोर्जमदग्निः ऋषिः । षष्ठं संहितम् । तस्य जमदग्निः ऋषिः । सप्तमं वसिष्ठस्य शकुनम् । वसिष्ठः ऋषिः । अष्टमं जमदग्नेर्गाम्भीरम् । तस्य जमदग्निः ऋषिः । नवमं संहितम् । तस्य प्रजापतिः ऋषिः ॥ (आ. गे. ८२८-३६) ॥ ४६८ ॥

---

12. My. काम्भः, BL. कम्भ्यः for कौम्भ्यः
19. Sm. संहितः for संहितम्
20. Sm. शकुलः for शकुनम्

वृषा पवस्व धारय (३) इत्यृचः भृगुर्वारुणी जमदग्निर्वा ऋषिः। सन्त्यत्र नव सामानि। तेषामाद्ये द्वे सोमसामनी। तयोः सोमः ऋषिः। तृतीयमाशुभार्गवम्। तस्य भृगुः ऋषिः। चतुर्थपञ्चमे वैश्वदेवे। तयोर्विश्वेदेवा ऋषयः। षष्ठसप्तमे इन्द्रसामनी। तयोरिन्द्रः ऋषिः। अष्टमनवमे यौक्ताश्वे। तयोर्युक्ताश्व आङ्गिरसः ऋषिः॥ (ग्रा. गे. ८३७-४५)॥ ४६९॥

यस्ते मदो वरेण्यः (४) इत्यृचः आमहीयुः ऋषिः। इह षड् सामानि। तेषामाद्यं भासम्। तस्यात्रिः ऋषिः। द्वितीयं सोमसाम। तस्य सोमः ऋषिः। तृतीयं प्राजापत्यम्। तस्य प्रजापतिः ऋषिः। चतुर्थं च सोमसाम। तस्य सोमः ऋषिः। पञ्चमं च भासम्। तस्याप्यत्रिः ऋषिः। षष्ठमध्यर्धेडं सोमसाम। तस्यापि सोमः ऋषिः॥ (ग्रा. गे. ८४६-५१)॥ ४७०॥

तिस्रो वाच उदीरते (५) इत्यृचः त्रितः ऋषिः। अत्रापि षड् सामानि। तेषामाद्यद्वितीये वैष्टम्भे। तयोर्विष्टम्भः ऋषिः। तृतीयचतुर्थे पाष्ठौहे। तस्य पष्ठवाड् आङ्गिरसः ऋषिः। पञ्चमं क्षुल्लकवैष्टम्भम्। तस्यापि विष्टम्भः ऋषिः। षष्ठमपि पाष्ठौहम्। तस्यापि पष्ठवाडाङ्गिरसः ऋषिः॥ (ग्रा. गे. ८५२-७)॥ ४७१॥

इन्द्रायेन्दो मरुत्वतः (६) इत्यृचः काश्यपः ऋषिः। सन्त्यत्राष्टौ सामानि। तेषामाद्यम् इषोवृधीयम्। तस्य प्रजापतिः ऋषिः। द्वितीयमिन्द्रसाम। तस्येन्द्रः ऋषिः। तृतीयचतुर्थे वैश्वदेवे। तयोर्विश्वेदेवा ऋषयः। पञ्चमषष्ठे आग्नेये। तयोरग्निः ऋषिः। सप्तमं वैश्वदेवम्। तस्य विश्वेदेवाः ऋषयः। अष्टमं चाग्नेयम्। तस्याग्निः ऋषिः॥ (ग्रा. गे. ८५८-६५)॥ ४७२॥

असाव्यंशुर्मदाय (७) इत्यृचः जमदग्निः ऋषिः। सन्त्यष्टौ सामानि। तेषामाद्यानि चत्वारि शैशवानि। तेषां शिशुराङ्गिरसः ऋषिः। पञ्चमादीनि पराणि च्यावनानि। तेषां च्यवनो भार्गवः ऋषिः॥ (ग्रा. गे. ८६६-७३)॥ ४७३॥

**पवस्व दक्ष साधनः** (८) इत्यृचः दृढच्युतः आगस्त्यः ऋषिः। प्राजापत्ये द्वे सामनी। तस्य प्रजापतिः ऋषिः॥ (ग्रा. गे. ८७४-५) ॥ ४७४ ॥

**परि स्वानो गिरिष्ठाः** (९) इत्यृचः काश्यपोऽसितः ऋषिः। इह षट् सामानि। आद्यानि चत्वारि वैदन्वतानि। तेषां विद्वान् भार्गवः ऋषिः। पञ्चमषष्ठे पदस्तोभौ। तयोः रजिराङ्गिरसः ऋषिः॥ (ग्रा. गे. ८७६-८१) ॥ ४७५ ॥

**परि प्रिया दिवः कविः** (१०) इत्यृचः काश्यपोऽसितः ऋषिः। साम्नोरौर्णायवयोः ऊर्णायुर्गन्धर्वः ऋषिः॥ (ग्रा. गे. ८८२-३) ॥ ४७६ ॥

इति पञ्चमेऽध्याये पावमानीषु प्रथमः खण्डः॥ १ ॥

## द्वितीयः खण्डः

**प्र सोमासो मदच्युतः** (१) इत्यृचः श्यावाश्वः ऋषिः। साम्नः सौभरस्य सुभरिः ऋषिः। (ग्रा. गे. ८८४) ॥ ४७७ ॥

**प्र सोमासो विपश्चित:** (२) इत्यृचः त्रितः ऋषिः। साम्नः सौभरस्य सुभरिः ऋषिः। द्वयोः सुश्रुर्वा ऋषिः॥ (ग्रा. गे. ८८५) ॥ ४७८ ॥

**पवस्वेन्दो वृषा सुतः** (३) इत्यृचः आमहीयुः ऋषिः। साम्नः इन्द्रवृषकस्य इन्द्रवृषः ऋषिः॥ (ग्रा. गे. ८८६) ॥ ४७९ ॥

**वृषा ह्यसि भानुना** (४) इत्यृचः भृगुः ऋषिः। साम्नोरिन्द्रवृषकयोः इन्द्रः ऋषिः॥ (ग्रा. गे. ८८७-८) ॥ ४८० ॥

**इन्दुः पविष्ट** (५) इत्यृचः कश्यपः ऋषिः। साम्नां त्रयाणां बभ्रोः कौम्भ्यसाम्नां बभ्रुः कौम्भ्यः ऋषिः॥ (ग्रा. गे. ८८९-८९१) ॥ ४८१ ॥

---

16, Sm. अमहीयुः for आमहीयुः

असृक्षत प्र वाजिनः (६) इत्यृचः कश्यपः ऋषिः । साम्नां त्रयाणां बभ्रोः कार्तवेशानां बभ्रुः कार्तवेशः ऋषिः ॥ (ग्रा. गे. ८९४) ॥ ४८२ ॥

पवस्व देव आयुषक् (७) इत्यृचः निद्ध्रुविः काश्यपः ऋषिः । साम्नोः शाम्मदयोः आङ्गिरसः शाम्मदः ऋषिः (ग्रा. गे. ८९५-६) ॥ ४८३ ॥

पवमानो अजीजनत् (८) इत्यृचः आमहीयुः ऋषिः । साम्नोर्जनित्रयोः वसिष्ठः ऋषिः ॥ (ग्रा. गे. ८९७-८) ॥ ४८४ ॥

परि स्वानास इन्दवः (९) इत्यृचः असितः ऋषिः । साम्नां मरुतां प्रक्रीडानां मरुतः ऋषिः ॥ (ग्रा. गे. ८९९-९०१) ॥ ४८५ ॥

परि प्रासिष्यदत्कविः (१०) इत्यृचः असितः ऋषिः । साम्नः औशनसस्य उशनाः काव्यः ऋषिः ॥ (ग्रा. गे. ९०२) ॥ ४८६ ॥

॥ इति पञ्चमेऽध्याये पावमानीषु द्वितीयः खण्डः ॥ २ ॥

## तृतीयः खण्डः

उपो षु जातमप्तुरम् (१) इत्यृचः आमहीयुः ऋषिः । साम्नां यामानां त्रयाणां यमः ऋषिः । (ग्रा. गे. ९०३-५) ॥ ४८७ ॥

पुनानो अक्रमीत् (२) इत्यृचः बृहन्मतिः ऋषिः । साम्नो अङ्कतेर्वैरूपस्य अङ्कतिः विरूपः ऋषिः । (ग्रा. गे. ९०६) ॥ ४८८ ॥

अविशन् कलशम् (३) इत्यृचः जमदग्निः ऋषिः । साम्नोरौशनयोरुशना ऋषिः ॥ (ग्रा. गे. ९०७-८) ॥ ४८९ ॥

असर्जि रथ्यः (४) इत्यृचः प्रभूवसुः ऋषिः । साम्नः क्षौमसाम्नः क्षौमः ऋषिः ॥ (ग्रा. गे. ९०९) ॥ ४९० ॥

प्र यद्गावो न भूर्णयः (५) इत्यृचः मेधातिथिः ऋषिः । साम्नोः कार्ष्णयोः कृष्णः ऋषिः ॥ (ग्रा. गे. ९१०-९११) ॥ ४९१ ॥

**अपघ्नन् पवसे मृधः** (६) इत्यृचः निध्रुविः ऋषिः ॥ साम्नः सोमसाम्नः सोमः ऋषिः ॥ (ग्रा. गे. ९१२) ॥ ४९२ ॥

**अया पवस्व धारय** (७) इत्यृचः निध्रुविः ऋषिः । साम्नः सूर्यसाम्नः सूर्यः ऋषिः ॥ (ग्रा. गे. ९१३) ॥ ४९३ ॥

**स पवस्व य आविथ** (७) इत्यृचः आमहीयुः ऋषिः । साम्नः इन्द्रस्य वार्त्रघ्नस्य इन्द्रो वृत्रहा ऋषिः ॥ (ग्रा. गे. ९१४) ॥ ४९४ ॥

**अया वीति परि स्रव** (८) इत्यृचः आमहीयुः ऋषिः । साम्नः सोमसाम्नां त्रयाणां सोमः ऋषिः ॥ (ग्रा. गे. ९१५-७) ॥ ४९५ ॥

**परि द्युक्षम्** (९) इत्यृचः उचथ्यः ऋषिः । साम्नो भारद्वाजस्य भरद्वाजः ऋषिः ॥ (ग्रा. गे. ९१८) ॥ ४९६ ॥

॥ इति पावमानीषु पञ्चमाध्याये तृतीयः खण्डः ॥ ३ ॥

## चतुर्थः खण्डः

**अचिक्रददृवृषा हरिः** (१) इत्यृचः मेधातिथिः ऋषिः । साम्नो वार्षाहरस्य वृषा हरिः ऋषिः ॥ (ग्रा. गे. ९१९) ॥ ४९७ ॥

**आ ते दक्षं मयो भुवम्** (२) इत्यृचः भृगुः ऋषिः । साम्नां वार्शानां त्रयाणां वृशो जानः ऋषिः (ग्र. गे. ९२०-२२) ॥ ४९८ ॥

**अध्वर्यो अद्रिभिः सुतम्** (३) इत्यृचः उचथ्यः ऋषिः । साम्नोरिन्द्रस्य वैरूपयोरिन्द्रविरूपः ऋषिः ॥ (ग्रा. गे. ९२३-४) ॥ ४९९ ॥

**तरत्स मन्दी धावति** (४) इत्यृचः अवत्सारः ऋषिः । साम्नस्तरन्तस्य वैतदथेः साम्नः तरन्तो वितदथिः ऋषिः ॥ (ग्रा.गे. ९२५) ॥ ५००॥

---

5. Sm. अमहीयुः for आमहीयुः

आ पवस्व सहस्रिणम् (५) इत्यृचः निध्रुविः ऋषिः। साम्नः सोमसामस्य सोमः ऋषिः ॥ (ग्रा. गे. ९२६) ॥ ५०१ ॥

अनुप्रत्नास आयवः (६) इत्यृचः असितः ऋषिः। साम्नः सूर्यस्य साम्नः सूर्यः ऋषिः ॥ (ग्रा. गे. ९२७) ॥ ५०२ ॥

अर्षा सोम (७) इत्यृचः भृगुः ऋषिः। साम्नां दार्ढच्युतानां त्रयाणां दृढच्युतः ऋषिः ॥ (ग्रा. गे. ९२८-९३०) ॥ ५०३ ॥

वृषा सोम द्युमाँ असि (८) इत्यृचः कश्यपः ऋषिः। साम्नः इन्द्रस्य वृषकस्य इन्द्रः ऋषिः ॥ (ग्रा. गे. ९३१) ॥ ५०४ ॥

इषे पवस्व (९) इत्यृचः कश्यपः ऋषिः। साम्नो ऐषस्य इट् ऋषिः॥ (ग्रा. गे. ९३२) ॥ ५०५ ॥

मन्द्रया सोम (१०) इत्यृचः असितः ऋषिः। साम्नः श्यावाश्वस्य श्यावाश्वः ऋषिः (ग्रा. गे. १३३) ॥ ५०६ ॥

अया सोम सुकृत्यया (११) इत्यृचः भार्गवः ऋषिः। साम्नः आयास्यस्य आयास्याङ्गिरसः ऋषिः ॥ ग्रा. गे. ९३४) ॥ ५०७ ॥

अयं विचर्षणिर्हितः (१२) इत्यृचः जमदग्निः ऋषिः। साम्न आग्नेयस्य अग्निः ऋषिः ॥ (ग्रा. गे. ९३५) ॥ ५०८ ॥

प्र ण इन्द्रो महे तु न (१३) इत्यृचः आयास्यः आङ्गिरसः ऋषिः। साम्नोरायास्ययोश्च स एव ऋषिः ॥ (ग्रा. गे. ९३६-७) ॥ ५०९ ॥

---

1. MyBL. तरत्समन्तस्य for तरन्तस्य. See CN.
   BMyL. निध्रविदा for निध्रुविः
6. L. after दृढच्युतः ऋषिः adds साम्नः सोमसामस्य दृढच्युतः ऋषिः
9. Sm. इषः for इट्
14. L. आयास्यः for आयस्य°; In Sm. अयासोमीय is the name of the gāna and अयासोम of the ṛṣi

**अपघ्नन् पवते मृध** (१४) इत्यृचः आमहीयुः ऋषिः। साम्नो भारद्वाजस्य भरद्वाजः ऋषिः ॥ (ग्र. गे. ९३८) ५१० ॥

॥ इति चतुश्चत्वारिंशत् पावमान्यो गायत्र्यः ॥

॥ इति पञ्चमेऽध्याये पावमानीषु चतुर्थः खण्डः ॥

---

## पञ्चमः खण्डः

अथ बृहत्यो द्वादशर्चः। तासामृचां प्रत्यृचं भरद्वाज-कश्यप-गौतम-अत्रि-विश्वामित्र-जमदग्नि-वसिष्ठाः सप्तर्षयः ऋषयः। बृहती छन्दः। पवमान-सोमो देवता ॥

**पुनानः सोम धारय** (१) इत्यत्र षोडश सामानि सन्ति। तेषां प्रथम-मायास्यं साम। तस्य आयास्याङ्गिरसः ऋषिः। माण्डवे द्वितीयम्। तस्य मण्डुः ऋषिः। तृतीयचतुर्थे आपदाससोमसामनी। तयोर्वसिष्ठसोमावृषी। पञ्चम-मायास्यम्। तस्य आयास्य ऋषिः। षष्ठं माण्डवम्। तस्य मण्डुः ऋषिः। उद्वत्प्राजापत्यं सप्तमम्। तस्य प्रजापतिः ऋषिः। अष्टममायास्यम्। तस्य आयास्यः ऋषिः। नवमं कण्वरथंतरम्। तस्य कण्वः ऋषिः। तिरश्चीन-मायास्यं दशमम्। तस्य आयास्यः ऋषिः। प्रजापतेः सदोविशीयमेकादशम्। तस्य प्रजापतिः ऋषिः। द्वादशत्रयोदशे जमदग्नेः सवासिनी। तयोर्जमदग्निः ऋषिः। चतुर्दशं वशिष्ठस्य प्लवः। तस्य वसिष्ठः ऋषिः। अग्नेः रौरवं पञ्चदशम। तस्य रुरुः ऋषिः। षोडशं यौधाजयम्। तस्य युधाजिदृषिः ॥ (ग्रा. गे. ९३९-५४) ॥ ५११ ॥

---

1. MyL. क्रुध for मृध; Sm. अमहीयुः for आमहीयुः

11. तृतीयचतुर्थे See CN.

12. Sm. reads अयास्यः in place of आयास्यः everywhere.

**परीतो षिञ्चता सुतम्** (२) इत्यृचः उक्ताः सप्तर्षय एव। इह अष्टादशसामानि गीतानि सन्ति। तत्र इन्द्रस्याच्छिद्रं प्रथम[म्]। तस्य विश्वामित्रः ऋषिः। रयिष्ठं द्वितीयम्। तस्य इन्द्रः ऋषिः।] तृतीयचतुर्थे भारद्वाजे। तयोर्भरद्वाजः ऋषिः। पञ्चमषष्ठे आभीशवे। तयोरभीशुः ऋषिः। सप्तमाष्टमे माण्डवे। तयोर्मण्डुः ऋषिः। नवमदशमे अङ्गिरसामभिवासपरिवाससी। तयोरङ्गिरसः ऋषिः। एकादशद्वादशे वैण[व]सोमक्रतवीये। तयोर्वेणुः सोमक्रतुश्च ऋषिः। द्वादशं माण्डवं वा। तस्य मण्डुः ऋषिः। त्रयोदशचतुर्दशे प्रजापतेर्गूर्दौ। कश्यपस्य प्रतोदौ वा। तयोर्गूर्दपक्षे प्रजापतिः ऋषिः। प्रतोदपक्षे कश्यपः ऋषिः। पञ्चदशषोडशे अङ्गिरसां गोष्ठपुंस्तनीये। तयोरङ्गिरसः ऋषिः। सप्तदशं महारौरवम्। तस्य रुरुः [ऋषिः]। अष्टादशं महायौधाजयम्। तस्य युधाजिदृषिः॥ (ग्रा. गे. ९५५-७२)॥ ५१२॥

**आ सोम स्वानः** (३) इत्यृचः उक्ता ऋषयः। सन्त्यत्र सामानि चत्वारि सोमसामानि। अश्वरूपः प्रजापतिः सोमो वा चतुर्णाम् ऋषिः॥ (ग्रा. गे. ९७३-६) ५१३॥

**प्र सोम देववीतये** (४) इत्यृचः उक्ता ऋषयः। सामानि पञ्च। आद्यमग्नेस्त्रिणिधनम्। तस्याग्निः ऋषिः। द्वितीयमग्नेर्वैश्वानरस्य साम। तस्याग्निर्वैश्वानरः ऋषिः। द्विर्हिंकारं वामदेव्यं तृतीयम्। तस्य वामदेवः ऋषिः। चतुर्थपञ्चमे आङ्गिरसाग्नुरसैधनिधेधौ। तयोरङ्गिरस ऋषिः॥ (ग्रा. गे. ९७७-८१)॥ ५१४॥

**सोम उ ष्वाणः सोतृभिः** (५) इत्यृचः उक्ता ऋषयः। सामानि षट्। तेषां सोमः ऋषिः। अश्वो वा॥ (ग्रा. गे. ९८२-७)॥ ५१५॥

**तवाहं सोम रारण** (६) इत्यृचः प्रागुक्ता ऋषयः। सामानि पञ्च। तयोराद्ये विष्णोरथमणी द्वे। वैष्णवे वा। तयोर्विष्णुः ऋषिः। आङ्गिरसानि पराणि त्रीणि। तेषामङ्गिरसः ऋषयः॥ (ग्रा. गे. ९८८-९९२)॥ ५१६॥

---

2. BMyL. after प्रथम ins. दशमे अङ्गिरसामभिवासपरिवाससी.

**मृज्यमानः सुहस्त्या** (७) इत्यृचः उक्ता ऋषयः। अष्टौ सामानि सन्ति। तेषामादितः औक्ष्णोरन्ध्राणि त्रीणि। तेषामुक्ष्णो रन्ध्रः काण्वः ऋषिः। चतुर्थपञ्चमषष्ठान्याग्नेयानि त्रीणि। तेषामग्निः ऋषिः। सप्तममौक्ष्णोरन्ध्रम्। उक्ष्णोरन्ध्रः काण्वः ऋषिः। अष्टमं वाजिजित्। तस्य प्रजापतिः ऋषिः॥ (ग्रा. गे. ९९३-१०००)॥ ५१७॥

**अभि सोमास आयवः** (८) इत्यृचः उक्ता ऋषयः। अष्टौ सामानि सन्ति। तत्राद्ये वैश्वदेवे। तयोर्विश्वेदेवा ऋषयः। तृतीयचतुर्थे इन्द्रसामनी। तयोरिन्द्रः ऋषिः। स्वपृष्ठमाङ्गिरसं पञ्चमम्। तस्याङ्गिरस ऋषयः। इन्द्रसामानि त्रीणि। तेषामिन्द्रः ऋषिः॥ (ग्रा. गे. १००८)॥ ५१८॥

**पुनानः सोम जागृविः** (९) इत्यृचः उक्ता ऋषयः। स्वःपृष्ठमाङ्गिरसं साम। तस्याङ्गिरा ऋषिः॥ (ग्रा. गे. १००९)॥ ५१९॥

**इन्द्राय पवते मदः** (१०) इत्यृचः उक्ता ऋषयः। त्रीणि सोमसामानि सन्ति। तेषां सोमः ऋषिः॥ (ग्रा. गे. १०१०-१२)॥ ५२०॥

**पवस्व वाजसातम** (११) इत्यृचः उक्ता एव ऋषयः [एकं सोमसाम।] सोमो देवता॥ (ग्रा. गे. १०१३)॥ ५२१॥

**पवमाना असृक्षत** (१२) इत्यृचः उक्ता एव ऋषयः। साम्नो देवानां पवित्रस्य देवा ऋषयः॥ (ग्रा. गे. १०१४)॥ ५२२॥

॥ बृहत्यः समाप्ताः॥

**॥ इति पञ्चमेऽध्याये पावमनीषु पञ्चमः खण्डः॥ ५॥**

---

10. In Sm. पुनानः is known as सोमसाम and the ṛṣi thereof as सोम.
12. त्रीणि सोमसामानि see CN.
19. BMyL. पावमानेऽध्याये पञ्चमोऽनुवाकः (LB. पञ्चमः खण्डः) for the colophon;

॥ षष्ठः खण्डः ॥

अथ त्रैष्टुभाः । विंशति[ ]द्वे [च] ऋचः खण्डद्वयेन तु [वक्ष्यन्ते] ॥

प्र तु द्रव (१) इत्यृचः उशना ऋषिः । इह सामानि पञ्च । तेषामाद्यमौशनम् । तस्योशना ऋषिः । परे द्वे वृशस्य जानस्याभीवर्तौ । तयोर्वृशो जानः ऋषिः । चतुर्थपञ्चमे औशने । तयोरुशना ऋषिः । सर्वाणि पञ्च वा औशनानि ॥ (ग्रा. गे. १०१५-९) ॥ ५२३ ॥

प्र काव्यमुशनेव ब्रुवाणः (२) इत्यृचः वृषगणो वासिष्ठः ऋषिः । चत्वारि इह सामानि । सर्वाणि वाराहाणि । वराहः ऋषिः ॥ (ग्रा. गे. १०२०-३) ॥ ५२४ ॥

तिस्रो वाच ईरयति प्र वह्निः (३) इत्यृचः पराशरः ऋषिः । इह त्रयोदश सामानि । होइहा । हा होइ इत्यादिस्तोभभेदेन प्रतीकोपात्तप्रथमपादेन दश । ओहा । ओहा ओहा इति स्तोभान्तरोपात्तद्वितीयपादेन एकम् । ततस्तोभान्तरोपात्ततृतीयपादेन एकम् । पुनःस्तोभान्तरोपात्तचतुर्थपादप्रतीकेन एकम् । एवं त्रयोदश सामानि । तत्र आदितस्त्रीणि अङ्गिरसां संकोशानि । तेषामङ्गिरा ऋषिः । चतुर्थपञ्चमे सामसरसी । तयोरङ्गिरा ऋषिः । षष्ठसप्तमे वेणोर्विशाले । तयोर्वेणुः ऋषिः । अष्टमनवमे गौतमस्य तन्त्रातन्त्रे । तयोर्गौतमः ऋषिः । दशमैकादशे अगस्त्यस्य यमिके । तयोरगस्त्यः ऋषिः । द्वादशत्रयोदशे इन्द्रस्य वारवन्तीये । तयोरिन्द्रः ऋषिः । मरुतां कालकाकन्द[ ]ज्याहीडौ वा द्वादशत्रयोदशे । तस्मिन् पक्षे तयोर्मरुतः ऋषिः (ग्रा. गे. १०२३-३६) ॥ ५२५ ॥

---

11. Sm. होइ । हो । हा३होइ for होइ हा । हा होइ ; त्रयोदश सामानि See CN.

14. °सुरसी for सरसी

15. My. विशाखे for विशाले.

**अस्य प्रेषा** (४) इत्यृचो वसिष्ठः ऋषिः। तत्र षट् सामानि वासिष्ठानि। तत्र प्रतीकोपात्तानि स्तोभभेदेन पञ्च वासिष्ठानि। षष्ठमिहवद्वासिष्ठम्। एवं षट् वासिष्ठानि॥ (ग्रा. गे. १०३७-४२)॥ ५२६॥

**सोमः पवते जनिता मतीनां** (५) इत्यृचः प्रतर्दनः ऋषिः। इह चत्वारि सामानि। तेषामाद्ये वासिष्ठे। एवमष्टौ वासिष्ठानि। तेषां वसिष्ठः ऋषिः। उत्तरे द्वे वसिष्ठस्य जनित्रे। तयोर्वसिष्ठः ऋषिः॥ (ग्रा. गे. १०४३-६)॥ ५२७॥

**अभि त्रिपृष्ठम्** (६) इत्यृचः वसिष्ठः ऋषिः। साम अङ्गिरसां व्रतोपोहः। तस्य अङ्गिरा ऋषिः। वसिष्ठस्य वा संपा। तदा (तस्य ?) वसिष्ठः ऋषिः। (ग्रा. गे. १०४७)॥ ५२८॥

**अक्रान्त्समुद्रः** (७) इत्यृचः पराशरः ऋषिः। तत्र वैयश्वं साम। व्यश्व आङ्गिरसः ऋषिः। (ग्रा. गे. १०४८)॥ ५२९॥

**कनिक्रन्ति** (८) इत्यृचः प्रस्कण्वः ऋषिः। तत्र द्वे सोमसामनी। तयोः सोमः ऋषिः॥ (ग्रा. गे. १०४९-५०)॥ ५३०॥

**एष स्य ते मधुमान्** (९) इत्यृचः उशना ऋषिः। तत्र ऐषं साम। तस्य इट् ऋषिः॥ (ग्रा. गे.) १०५१)॥ ५३१॥

**पवस्व सोम मधुमान्** (१०) इत्यृचः प्रतर्दनः ऋषिः। तत्र माधुच्छन्दसं साम। तस्य मधुच्छन्दा ऋषिः॥ (ग्रा. गे. १०५२)॥ ५३२॥

॥ इति पञ्चमेऽध्याये पावमानीषु षष्ठः खण्डः॥ ६॥

## सप्तमः खण्डः

**प्र सेनानीः** (१) इत्यृचः प्रतर्दनः ऋषिः। त्रिष्टुप् छन्दः। अत्र त्रीणि सामानि कुत्सस्याधिरथीयानि। तेषां कुत्सः ऋषिः॥ (ग्रा. गे. १०५३-५)॥ ५३३॥

1. BMyL. प्रेषयति for प्रेषा.

प्र ते धारा मधुमति (२) इत्यृचः पराशर ऋषिः। साम्नो वैश्वज्योतिषस्य विश्वज्योतिः ऋषिः॥ (ग्रा. गे. १०५६)॥ ५३४॥

प्र गायताभ्यर्चाम (३) इत्यृचः इन्द्रप्रमतिर्वा वसिष्ठः ऋषिः। साम वैश्वज्योतिषम्। तस्य विश्वज्योतिः ऋषिः॥ (ग्रा. गे. १०५७)॥ ॥ ५३५॥

प्र हिन्वान (४) इत्यृचः वसिष्ठः ऋषिः। साम वैश्वज्योतिषम्। तस्य विश्वज्योतिः ऋषिः॥ (ग्रा. गे. १०५८)॥ ५३६॥

तक्षद्यदी (५) इत्यृचः दृढीको वासिष्ठः ऋषिः। तत्र द्वे वाचः सामनी। तयोर्वागृषिः॥ (ग्रा. गे. १०५९-६०)॥ ५३७॥

साकमुक्षो मर्जयन्त (६) इत्यृचः नृमेधाः काक्षीवतः ऋषिः। तत्र द्वे सामनी दाशस्पत्ये। तयोर्दशस्पतिः ऋषिः॥ (ग्रा. गे. १०६१-२)॥ ॥ ५३८॥

अधि यद्स्मिन् (७) इत्यृचः कण्वः ऋषिः। साम कश्यपस्य शोभनम्। तस्य कश्यपः ऋषिः॥ (ग्रा. गे. १०६३)॥ ५३९॥

इन्दुर्वाजी पवते (८) इत्यृचः इन्दुर्वासिष्ठः ऋषिः। अत्र चत्वारि सामनि दाशस्पत्यानि। तेषां दशस्पतिः ऋषिः॥ (ग्रा. गे. १०६४-७) ॥ ५४०॥

अया पवा पवस्वैना: (९) इत्यृचः कुत्सः ऋषिः। अत्र त्रीणि सामानि श्नुष्टेराङ्गिरसस्य सामानि। तेषां श्नुष्टिराङ्गिरसः ऋषिः॥ (ग्रा. गे. १०६८-७०)॥ ५४१॥

---

8. Sm. कर्णश्रुद्वासिष्ठः for दृढीको वासिष्ठः; My दृढोकः for दृढीकः
10. Sm. नोधाः for नृमेधाः
19. My BL. श्रुष्टेर् for श्नुष्टेर्; My श्रुष्टिर् for श्नुष्टिर्

**महत्तत्सोमो महिषश्चकार** (१०) इत्यृचः पराशरः ऋषिः। साम्नः आत्रस्य अत्रिः ऋषिः ॥ (ग्रा. गे. १०७१) ॥ ५४२ ॥

**असर्जि वक्वा** (११) इत्यृचः कश्यपः ऋषिः। साम्नो वासिष्ठस्य वसिष्ठः ऋषिः ॥ ग्रा. गे. १०७२) ॥ ५४३ ॥

**अपामीवत्** (१२) इत्यृचः प्रस्कण्वः ऋषिः। साम अपां साम। तस्य आपः ऋषिः। [ए] तेषां त्रयाणाम् अग्निर्वैश्वानरो वा ऋषिः ॥ (ग्रा. गे. १०७३) ॥ ५४४ ॥

॥ इति त्रिष्टुभः ॥

**इति पञ्चमेऽध्याये पावमानीषु सप्तमः खण्डः ॥ ७ ॥**

---

## अष्टमः खण्डः

अथानुष्टुभ्यः ॥

पुरोजिती नवर्चोऽत्र बृहत्याद्यर्यतायया।
अष्टावनुष्टुभः शिष्टाः वक्ष्यन्ते ऋषयः पृथक् ॥

**पुरोजिती** (१) इत्यस्याः श्यावाश्वः ऋषिः। इह षट् सामानि। आद्यौ द्वौ नकुलस्य वामदेवस्य मेह्लौ। महाकार्तयशं तृतीयम्। और्ध्वसद्मनं चतुर्थम्। श्यावाश्वान्धीगवे पञ्चमषष्ठे। आद्ययोर्द्वयोर्वामदेवः ऋषिः। कार्तयशसस्य कृतयशाः और्ध्वसद्मनस्य ऊर्ध्वसद्मा ऋषिः। पञ्चमस्य श्यावाश्वस्य अर्चनानसः ऋषिः। आन्धीगवस्य अन्धीगुः ऋषिः ॥ (ग्रा. गे. १०७४-९) ॥ ५४५ ॥

---

3. MyBL, काश्यपः for कश्यपः

8. L. त्रिष्टुभ्यः for त्रिष्टुभः

12. My BL, प्रेह्ला° for बृहत्या

14. Sm, श्यावाश्विः आश्वीगुः for श्यावाश्वः; My BL, before श्यावाश्वः add ऋषयः; My. ऋषयः for ऋषिः.

**अयं पूषा** (२) इत्युचः नहुषो मानवः ऋषिः। तत्र त्रीणि क्रौञ्चानि सामानि। तेषां क्रौञ्चः ऋषिः॥ (ग्रा. गे. १०८०-२)॥ ५४६॥

**सुतासो मधुमत्तमाः** (३) इत्यृचः ययातिर्नाहुषः ऋषिः। इहाष्टौ सामानि सन्ति। प्रथमद्वितीये त्वाष्ट्रीसामनी। तयोस्त्वष्टा ऋषिः। वासिष्ठं तृतीयम्। तस्य वसिष्ठः ऋषिः। चतुर्थमपि त्वाष्ट्रीसाम। तस्य त्वष्टा ऋषिः। पञ्चमं च वासिष्ठम्। तस्य वसिष्ठः ऋषिः। षष्ठसप्तमे त्वाष्ट्रीसामनी। तयोस्त्वष्टा ऋषिः। अष्टमं च वासिष्ठम्। तस्य वसिष्ठः ऋषिः। (ग्रा. गे. १०८३-९०)॥ ५४७॥

**सोमाः पवन्त इन्दवः** (४) इत्युचः मनुः सांवरणः ऋषिः। तत्र द्वे सामनी कौञ्चे। तयोः कुञ्चः ऋषिः॥ (ग्रा. गे. १०९१-२)॥ ५४८॥

**अभी नो वाजसातमम्** (५) इत्युचः ऋजिश्वाम्बरीषश्च ऋषी। इह पञ्च सामानि सन्ति। आद्यानि त्रीणि सोमसामानि। पञ्चमं च। तेषां सोमः ऋषिः। क्रौञ्चं चतुर्थम्। तस्य कुञ्चः ऋषिः॥ (ग्रा. गे. १०९३-७)॥ ५४९॥

**अभी नवन्ते अद्रुहः** (६) इत्यृचः रेभश्च सूनुश्च काश्यपौ द्वौ सहैव। अत्र आङ्गिरसानि त्रीणि सामानि। तेषामङ्गिरा ऋषिः॥ (ग्रा. गे. १०९८-११००)॥ ५५०॥

**आ हर्यताय** (७) इत्युचः रेभसूनुः काश्यपः ऋषिः। इह चत्वारि सामानि गृत्समदस्य सूक्तानि। तेषां गृत्समदः ऋषिः। बृहती छन्दः (ग्रा. गे. ११०४)॥ ५५१॥

**परि त्यं हर्यतम्** (८) इत्यृचः ऋजिश्वाम्बरीषश्च ऋषी। साम आकूपारम्। तस्य अकूपारः ऋषिः॥ (ग्रा. गे. ११०५)॥ ५५२॥

---

11. My LB ऋजिश्वा° for ऋजिश्वा°
15. MyLB. काश्यपयोर्द्वयोः for काश्यपौ द्वौ

**प्र सुन्वनायान्धसः** (९) इत्यृचः प्रजापतिः ऋषिः। साम वैरूपम्। तस्य विरूपः ऋषिः। नृगो वा ॥ (ग्रा. गे. ११०६) ॥ ५५३ ॥

इत्यनुष्टुभः ॥

इति पञ्चमेऽध्याये पावमानीषु अष्टमः खण्डः ॥ ८ ॥

---

## नवमः खण्डः

अथ जगत्यः ॥

जगत्यो द्वादशाभीति तिस्र आद्याश्च पञ्चमीम्।
कविर्ददर्श तुर्यां च षष्ठीं चर्षिगणोऽब्रवीत् ॥
निवापरस्तात् (निवावरी वा ?) सिकतास् (ता?) त्रिरस्मै रेणुरैक्षत।
वेनो भार्गव इन्द्राय सोमेत्यृच ऋषिस्ततः ॥
असावि सोम इत्येतां भारद्वाजोऽब्रवीद्वसुः।
प्र देवमिति वत्सप्रिरभिक्रन्दन्त इत्यृचः ॥
ऋषिराङ्गिरसोऽपश्यत् पवित्रो द्वादशीमृचम्।

अथ जगत्य ऋचो द्वादश। **अभि प्रियाणि** (१) इत्यृचः कविः ऋषिः। साम्नां षण्णामाद्यं कावम्। तस्य कविः ऋषिः। द्वितीयं च कावम्। तस्य च कविः ऋषिः। तृतीयं वाजसनि। तस्य ऋषिर्वाजसनिः। चतुर्थपञ्चमे वाजजिती। तयोः प्रजापतिः ऋषिः। षष्ठं कावम्। तस्य कविः ऋषिः ॥ (ग्रा. गे. ११०७-१८) ॥ ५५४ ॥

**अचोदसो नः** (२) इत्यृचः कविः ऋषिः। इह षट् सामानि। आद्यमुद्वद्भार्गवम्। तस्य भृगुः ऋषिः। द्वितीयमाङ्गिरसम्। तस्य अङ्गिरा

---

8. My अवर्दंश, B कवर्ददर्शं for कविर्ददर्शं; BMyL. षष्ठं च वर्षं for षष्ठीं चर्षि°
13. B MyL. द्वादशी ऋचः for द्वादशीमृचम्
14. My B जगत्यो for जगत्य
16. MyBL. वाजसामनी for वाजसनि

ऋषिः । तृतीयं साम राजम् । तस्य प्रजापतिः ऋषिः । चतुर्थपञ्चमे सोमराजे । तयोः प्रजापतिः ऋषिः । षष्ठं सिमानां निषेधः । तस्य प्रजापतिः ऋषिः ॥ (ग्रा. गे. १११९-२४) ॥ ५५५ ॥

**एष प्र कोशे** (३) इत्यृचः कविः ऋषिः । साम वासिष्ठम् । तस्य वसिष्ठः ऋषिः ॥ (ग्रा. गे. ११२५) ॥ ५५६ ॥

**प्रो अयासि** (४) इत्यृचः ऋषिगणः ऋषिः । अत्र सामानि पञ्च । आद्ये द्वे कौशे । द्वयोर्लुशः ऋषिः । प्रवद्भार्गवं तृतीयम् । तस्य भृगुः ऋषिः । विरूपस्य तन्त्रे चतुर्थम् । तस्य विरूपः ऋषिः । यामं पञ्चमम् । तस्य यमः ऋषिः ॥ (ग्रा. गे. ११२६-३०) ॥ ५५७ ॥

**धर्ता दिवः पवते** (५) इत्यृचः कविः ऋषिः । अत्र द्वे सामनी दासशिरसी । तयोः प्रजापतिः ऋषिः ॥ (ग्रा. गे. ११३१-२) ॥ ५५८ ॥

**वृषा मतीनां पवते विचक्षणः** (६) इत्यृचः ऋषिगणः ऋषिः । यामानि त्रीणि सामानि । तेषां यमः ऋषिः ॥ (ग्रा. गे. ११३३-५) ॥५५९॥

**त्रिरस्मै सप्त धेनवः** (७) इत्यृचः रेणुः ऋषिः । साम मरुतां धेनु । तस्य मरुतः ऋषयः ॥ (ग्रा. गे. ११३६) ॥ ५६० ॥

**इन्द्राय सोम सुषुतः** (८) इत्यृचः वेनो भार्गवः ऋषिः । द्वे सामनी इन्द्रस्यापामीवनी । तयोरिन्द्रः ऋषिः ॥ (ग्रा. गे. ११३७-८) ॥ ५६१ ॥

**असावि सोमो वृषा हरिः** (९) इत्यृचः वसुः भारद्वाजः ऋषिः । यामानि त्रीणि सामानि । तेषां यमः ऋषिः ॥ (ग्रा. गे. ११३९-४२) ॥ ५६२ ॥

---

6. Sm. सिकता निवावरी for ऋषिगणः

16. In Sm. the first is known as अपामीव of which Indra is the ṛṣi and the second as वायोरभिक्रन्द of which वायुः is the ṛṣi

प्र देवमच्छा (१०) इत्यृचः वत्सप्रिर्भालन्दनः ऋषिः। साम मरुतां धेनु ॥ (ग्रा. गे. ११४२) ॥ ५६३ ॥

अञ्जते व्यञ्जते (११) इत्यृचः आङ्गिरसः ऋषिः। त्रीणि काक्षीवतानि सामानि। तेषां कक्षीवानृषिः ॥ (ग्रा. गे. ११४३-५) ॥ ५६४ ॥

पवित्रं ते विततम् (१२) इत्यृचः पवित्रः ऋषिः। द्वे सामनी अर्कपुष्पे। तयोरादित्यः ऋषिः ॥ (ग्रा. गे. ११४६-७) ॥ ५६५ ॥

इति जगत्यः ॥

इति पञ्चमेऽध्याये पावमानीषु नवमः खण्डः ॥ ९ ॥

---

## दशमः खण्डः

इन्द्रमच्छा सुता इम इत्याद्यृचः अनुवाकस्य दशर्चासुष्णिक् छन्दः ॥

इन्द्रमच्छ सुत (१) इत्यृचः चाक्षुषः ऋषिः। तत्र पञ्च सामानि। आद्ये वसिष्ठस्य पदे। तयोर्वसिष्ठः ऋषिः। तृतीयचतुर्थे वसिष्ठस्यानुपदे। तयोश्च वसिष्ठः ऋषिः। पौष्कलः पञ्चमः। तस्य पुष्कलः ऋषिः। प्रजापतिर्वा ॥ (ग्रा. गे. ११४८-५२) ॥ ५६६ ॥

प्र धन्वा सोम (२) इत्यृचः [चक्षुः] मनुः (मानवः?) ऋषिः। तत्र पञ्च सामानि ऐषिराणि। तेषामिषिरः ऋषिः ॥ (ग्रा. गे. ११५३-७) ॥ ५६७ ॥

सखाय आ नि षीदत (३) इत्यृचः पर्वतनारदावृषी। अत्र पञ्च सामानि शौक्तानि। तेषां शुक्तिराङ्गिरसः ऋषिः ॥ (ग्रा. गे. ११५८-६२) ॥ ५६८ ॥

---

10. MyLB. इत्यृचः इत्यनु° for इत्याद्यृचः अनु°.

तं वः सखाय (४) इत्यृचः पर्वतनारदावृषी। अत्र त्रीणि सामानि कार्णश्रवसानि। तेषां कर्णश्रवा आङ्गिरसः ऋषिः॥ (आ. गे. ११६३-५) ॥ ५६९ ॥

प्राणा शिशुर्महीनाम् (५) इत्यृचः त्रितः ऋषिः। अत्र पञ्च सामानि। आद्ये द्वे वाचः सामनी। तयोर्वागृषिः। तृतीयचतुर्थे इन्द्रसामनी। तयोरिन्द्रः ऋषिः। पञ्चमं मैङ्गम्। तस्य मरुतः ऋषिः॥ (आ. गे. ११६६-७०)॥ ५७० ॥

पवस्व देववीतये (६) इत्यृचः मनुराप्सवः ऋषिः। तत्र द्वे प्राजापत्यसामनी। तयोः प्रजापतिः ऋषिः॥ (आ. गे. ११७१-२)॥ ५७१ ॥

सोमः पुनान ऊर्मिणा (७) इत्यस्या ऋचः चाक्षुषः ऋषिः। इह षट् सामानि। तत्र आद्ये सुज्ञाने। तयोरिन्द्रः ऋषिः। तृतीयचतुर्थे द्यौते। तयोर्द्युतः ऋषिः। पञ्चमषष्ठे अतीषादीये। [तयोः] प्रजापतिः ऋषिः॥ (आ. गे. ११७३-८)॥ ५७२ ॥

प्र पुनानाय वेधसे (८) इत्यृचः द्वितः ऋषिः। तत्र द्वे सामनी सोमसामनी। तयोः सोमः ऋषिः॥ (आ. गे. ११७९-८०)॥ ५७३ ॥

गोमन्न इन्दो (९) इत्यृचः पर्वतनारदावृषी। साम सोमसाम। तस्य सोमः ऋषिः॥ (आ. गे. ११८१)॥ ५७४ ॥

अस्मभ्यं त्वा वसुविदम् (१०) इत्यृचः पर्वतनारदावृषी। साम सोमसाम। तस्य सोम ऋषिः॥ (आ. गे. ११८२)॥ ५७५ ॥

पवते हर्यतः (११) इत्यृचः चाक्षुषः ऋषिः। अत्र सोमस्य यशांसि त्रीणि सामानि। [तेषां सोमः ऋषिः]॥ (आ. गे. ११८३-५)॥ ५७६॥

---

8. Sm. आप्सव: for आप्लवः

15. MyB. Om. सोमसामनी

**परि कोशं मधुश्चुतम्** (१२) इति द्वादश्या ऋचः त्रितः ऋषिः ॥ साम भारद्वाजम् । तस्य भरद्वाजः ऋषिः । (आ. गे. ११८६) ॥ ५७७ ॥

॥ इत्यौष्णिहर्चः ॥

॥ इति पञ्चमेऽध्याये पावमानीषु दशमः खण्डः ॥

---

## एकादशः खण्डः

अथ काकुभ्यः ॥

**पवस्व मधुमत्तम** (१) इत्यृचः गौरीवितः ऋषिः । तत्र पञ्च सामानि । तेषामाद्यं वासिष्ठम् । तस्य वसिष्ठः ऋषिः । द्वितीयतृतीये सफे । तयोर्देवाः । चतुर्थं वासिष्ठम् तस्य वसिष्ठः । पञ्चमं सफम् । तस्य देवाः ॥ (आ. गे. ११८७-११९१) ॥ ५७८ ॥

**अभि द्युम्नम्** (२) इत्यृचः ऊर्ध्वसद्मा ऋषिः । अत्र चत्वारि सामानि ऐबिराणि । तेषामिषिरः ऋषिः ॥ (आ. गे. ११९२-५) ॥ ५७९ ॥

**आ सोता परि षिञ्चत** (३) इत्यृचः [ऋजिश्वा भारद्वाजः] ऋषिः । अत्र षट् सामानि । आद्यानि त्रीणि कार्णश्रवसानि । तेषां कर्णश्रवा आङ्गिरसः ऋषिः । पराणि त्रीणि वाचः सामानि । तेषां वागृषिः ॥ (आ. गे. ११९६-१२०२) ॥ ५८० ॥

**एतमु त्यं मदच्युतम्** (४) इत्यृचः [कृतयशाः] ऋषिः । इह षट् सामानि । तेषामाद्ये कौल्मलबर्हिषे । तयोः कुल्मलबर्हिः ऋषिः । तृतीयं शङ्कु । तस्य प्रजापतिः ऋषिः । सोमसामानि त्रीणि पराणि । तेषां सोमः ऋषिः ॥ (आ. गे. १२०२-७) ॥ ५९२ ॥

---

7. Sm. गौरीवीतिः for गौरीवितः
11. BMyL. कृतयशाः for ऊर्ध्वसद्मा
13. BMyL. कार्णश्रवा for ऋजिश्वा भारद्वाजः
17. BMyL. कर्णश्रवः for कृतयशाः

[स सुन्वे यो वसूनाम् (५) इत्यृचः ऋणंचयः ऋषिः। अत्र पञ्च सामानि। आद्ये द्वे लोमनी। तयोर्भरद्वाजः ऋषिः। सोमसामानि त्रीणि पराणि। तेषां सोमः ऋषिः॥ (ग्रा. गे. १२०८-१२)॥ ५८२॥]

[त्वं ह्यङ्ग दैव्य (६) इत्यस्या ऋचः शक्तिः ऋषिः। अत्र चत्वारि सामानि श्यैतोष्माणि। तेषां प्रजापतिः ऋषिः॥ (ग्रा. गे. १२१३-६)॥ ५८३॥]

एष स्य धारया (७) इत्यृचः ऊरुराङ्गिरसः ऋषिः। अत्र पञ्च सामानि। आद्यं गायत्रपार्श्वम्। तस्य देवाः ऋषयः। द्वितीयं सन्तनि। तस्य देवाः ऋषयः। पराणि त्रीणि सोमसामानि। तेषां सोमः ऋषिः॥ (ग्रा. गे. १२१७-२१)॥ ५८४॥

इति ककुभः॥

एकोनविंशतिशतं पावमान्य इतीरितम्।
शतानि पञ्चाशीतिश्च पञ्च वाप्यखिला ऋचः॥

इति पञ्चमेऽध्याये पावमानीषु एकादशः खण्डः॥ १॥

॥ पञ्चमोऽध्यायः॥

---

7. BMyL. Om. ऊरुराङ्गिरसः ऋषिः and ins. काकुभः प्रगाथः शक्तिः ऋषिः काकुभः प्रगाथश्छन्दः ऋषिः instead.

12. एकोनविंशतिशतम् See CN.

13. BL. अथ for ऋचः॥

# अरण्यकाण्डम्

## षष्ठोऽध्यायः

### प्रथमः खण्डः

आरण्यकानां साम्नां षड् पञ्चाशच्चर्चे आसु तु ।
छन्दोदैवतमार्षं च तत्र तत्राभिदध्महे ॥

इह त्रिविधा ऋचः । ग्रामेगेयार्थमेवाधीताः काश्चन । अरण्येगेयार्थमेवापराः । उभयार्थमन्याः । याश्चोभयार्थाः याश्च केवलारण्येगेयार्थाः तासूभयविधासु यानि सामानि तेषामुभयेषां साम्नामृचां च विस्पष्टार्थमृषिच्छन्दोदेवता अभिधीयन्ते ॥

## अर्कपर्व

### प्रथमोऽनुवाकः

तत्र तावत् (१) यद्याव इन्द्र ते शतम् (२७८) इत्यृचः देवातिथिः (पुरुहन्मा आङ्गिरसः?) ऋषिः । बृहती छन्दः । इन्द्रो देवता । इहाष्टौ सामानि वैरूपाणि । तेषां विरूपः ऋषिः । अञ्जो वैरूपमाद्यम् । ह्रस्वा च बृहद्दोपशा द्वितीयम् । पञ्चनिधनं वैरूपं तृतीयम् । षण्णिधनं चतुर्थम् । सप्तनिधनं पञ्चमम् । अष्टानिधनं षष्ठम् । द्वादशनिधनं सप्तमम् । पुष्यमष्टमम् । तेषां विरूपः ऋषिः । इन्द्रो देवता ॥ (आ. गा. १-८) ॥ १

---

1. The Ms. S begins with आर्षेयब्राह्मणं भट्टभास्करीयम् (आरण्यकम्) । This does not have the previous Kāṇḍas.

4. My. before आरण्यकानां adds अथ ; My आसतुः for आसु तु.

13. S. Om. च

(२) पिबा सुतस्य रसिनः (२३९) इत्यस्यां द्वे सामनी अन्तरिक्षे। मेधातिथिः ऋषिः। उभयोश्च इन्द्रो देवता। बृहती छन्दः। साम्नोः प्रजापतिः ऋषिः। विश्वेदेवा वा॥ (आ. गा. ९-१०) ॥ २ ॥

(३) पवित्रं ते विततम् (५६५) इत्यस्या ऋचः पवित्रः ऋषिः। जगती छन्दः। सोमो देवता। हाइ होइया। पावीति सामनी द्वे अरिष्टनामनी। तयोर्देवा ऋषयः। छन्दोदेवते ऋग्वत्॥ (आ. गा. ११-२) ॥ ३ ॥

(४)अभि त्वा पूर्वपीतये (२६२) इत्यृचो मेधातिथिः ऋषिः। बृहती छन्दः। इन्द्रो देवता। हावाभी - अभीहाउत्वापूर्वेति द्वे सामनी अहरीते। तयोः प्रजापतिः ऋषिः। ऋग्वत् छन्दोदेवते॥ (आ. गा. १३-४) ॥ ४ ॥

इत्यारण्यकगानेऽर्कपर्वणि प्रथमः खण्डः॥

द्वितीयः खण्डः

पिबा सुतस्य (२३९) इत्यस्या ऋचः मेधातिथिः ऋषिः। बृहती छन्दः। इन्द्रो देवता। हाउ पिबासुता इति [वरुणस्य देवस्थानम्।] तस्य वरुणः ऋषिः। ऋग्वत् छन्दोदेवते॥ (आ. गा. १५) ॥ ५ ॥

बृहदिन्द्राय गायत (२५८) इत्यृचो नृमेधपुरुमेधावृषी। बृहती

---

1. My रसिने अस्यां, BL. रसिनेत्यस्यां for रसिन इत्यस्यां
5. My हाहो हाहौ, LB. हाइ होहाहो for हाइ। होइया.
6. S. नामके for नामनी
10. BMyL. ऋग्वत् for ऋग्वत्
14. BMyL. हाउ पिबा सुता पिबा सुतेति द्वे सामनी। आद्यं देवस्थानम्। द्वितीयं बृहद्देवस्थानम्। तयोर्, S. हाउपिबासुता। तयोर् for हाउपिबा......तस्य see CN.

छन्दः । इन्द्रो देवता । तत्र कद्वृहदिति साम्नः बृहद्देवस्थानस्य प्रजापतिः ऋषिः । हाउहाउहाउ इति [अस्य] स्वरितस्तोभ इति क इति [च] संज्ञा सर्वत्र । ऋग्वच्छन्दोदेवते ॥ (आ. गे. १६) ॥ ६ ॥

पुनानः सोम धारया (५११) इत्यृचो भरद्वाज-कश्यप-गौतम-अत्रि-विश्वामित्र-जमदग्नि-वसिष्ठाः सप्त ऋषयः । बृहती छन्दः । पवमानः सोमो देवता । तत्र ऐरा[यात् । (द्विः) । ऐरायात् । सुवरा । हाहोइ] पुनेति ऐरयं (यत् ?) साम । तस्य वरुणः ऋषिः । ऋग्वच्छन्दो देवते ॥ (आ. गा. १७) ॥ ७ ॥

(४) अभि त्वा पूर्वपीतये (२५६) इत्यृचो मेधातिथिः ऋषिः । बृहती छन्दः । इन्द्रो देवता । अत्र हावौहोहाउ अभित्वेति ऐरिणं साम । तस्य वरुणः ऋषिः । ऋग्वच्छन्दोदेवते ॥ (आ. गा. १८) ॥ ८ ॥

(५) पुनानः सोम धारया (५११) इत्यृचः भरद्वाजादयः सप्तर्षयः । बृहती छन्दः । सोमो देवता । तत्र क हौरा पुनेति आङ्गिरसं साम । तस्य अङ्गिराः ऋषिः । ऋग्वच्छन्दोदेवते ॥ (आ. गा. १९) ॥ ९ ॥

(६) तवेदिन्द्रावमं वसु (२७०) इत्यस्या ऋचः वसिष्ठः ऋषिः । बृहती छन्दः । इन्द्रो देवता । तत्र औहोवातवेति आङ्गिरसं साम । तस्य अङ्गिरा ऋषिः । ऋग्वच्छन्दोदेवते । औहौतवेति तत्रैव बार्हस्पत्यं साम । बृहस्पतिः ऋषिः । ऋग्वच्छन्दोदेवते ॥ (आ. गा. २०-१) ॥ १० ॥

---

1. S. साम्नः बृहद्देवस्थानस्य for कद्वृहदिति...°स्थानस्य ; BMyL. कद्वृहदिति ऐरयं साम for प्रजापतिः ऋषिः ;
2. S. Om हाउहाउहाउ......सर्वत्र । see CN.
3. BMyL. before ऋग्वच् add तस्य वरुण ऋषिः
7. BMyL. ऐरिणं for ऐरयं
12. S. Om. पुनानः ...... °देवते(L. 14)

(७) आ त्वा सहस्रमा शतम् (२४५) इत्यृचः मेधातिथिः ऋषिः। बृहती छन्दः। इन्द्रो देवता। तत्र औहोआत्वेति भारद्वाजं साम। तस्य भरद्वाजः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गे. २२)॥ ११॥

(८) शं नो देवीः (३३) इत्यृचः सिन्धुद्वीपः ऋषिः। गायत्री छन्दः। आपो देवता। तत्र उहुवा शन्न इत्याथर्वणं साम। तस्याथर्वाङ्गिरसः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गे. २३)॥ १२॥

(९) इन्द्र ज्येष्ठं न आ भर (५८६) इत्यृचो भरद्वाजः ऋषिः। बृहती छन्दः। इन्द्रो देवता। तत्र औहोइन्द्रज्येष्ठमिति नारद्वसवं साम। तस्य नरद्वसुः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गे. २४)॥ १३॥

(१०) कया नश्चित्र आ भुवत् (१६९) इत्यस्या ऋचः वामदेवः ऋषिः। गायत्री छन्दः। इन्द्रो देवता। कशृद्द्वामम्-वृहद्वामं कयेति बृहती वामदेव्ये द्वे सामनी। तयोर्वामदेवः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गे. २५-६)॥ १४॥

(११) त्वामिद्धि हवामहे (२३४) इत्यृचो भरद्वाजः ऋषिः। बृहती छन्दः। इन्द्रो देवता। औहोइत्वामिद्धीति बृहत्साम। तस्य भरद्वाजः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. २७)॥ १५॥

**इत्यारण्यकगानेऽर्कपर्वणि द्वितीयः खण्डः॥ २॥**

## तृतीयः खण्डः

(१) इन्द्रं नरः (३१८) इत्यृचः वसिष्ठः ऋषिः। त्रिष्टुप् छन्दः। इन्द्रो देवता। तत्र इया-औहो इन्द्रन्नर इति वसिष्ठजमदग्न्योरर्कौ द्वे सामनी। तयोर्वसिष्ठजमदग्नी ऋषी। ऋग्वच्छन्दोदेवते॥ (आ. गा. २८-९)॥ १६॥

---

6. My. ऋक् for ऋग्वत्

9. MyBL. नारद्वसुः for नरद्वसुः

(२) स्वादिष्ठया मदिष्ठया (४६८) इत्यृचः मधुच्छन्दा ऋषिः। गायत्री छन्दः। पवमानसोमो देवता। तत्र अयामायाम्। स्वादिष्ठयेति स्वाशिरामर्कः। स्वाशिराः प्राणा ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ३०)॥ १७॥

(३) धर्ता दिवः पवते (५५८) इत्यृचः कविः ऋषिः। जगती छन्दः। सोमो देवता। तत्र कौहोवाएहियाहाउ धर्तेति दीर्घतमसोऽर्कः। तस्य दीर्घतमा ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ३१)॥ १८॥

(४) प्र व इन्द्राय बृहता (२५७) इत्यृचः नृमेधपुरुमेधसावृषी। तत्र कप्रव - कसन्त्वानोनवुरिति मरुतामर्कौ द्वे सामनी। तयोर्मरुतः ऋषिः। बृहती छन्दः। इन्द्रो देवता॥ (आ. गा ३२-३)॥ १९॥

(५) अग्निर्मूर्द्धा (२७) इत्यस्या ऋचः विरूपः ऋषिः। गायत्री छन्दः। अग्निर्देवता। तत्र होहोवा अग्निर्मूर्धा इति अग्नेरर्कः एकं साम। तस्याग्निः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ३४)॥ २०॥

(६) अयं पूषा रयिर्भगः (५४६) इत्यृचो नहुषो मानवः ऋषिः। अनुष्टुप् छन्दः। पवमानसोमो देवता। तत्र होवाअयंपूषेति प्रजापतेरर्कः एकं साम। तस्य प्रजापतिः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ३५)॥२१॥

(७) इन्द्रो राजा जगतश्चर्षणीनाम् (५८७) इत्यृचो वसिष्ठः ऋषिः। त्रिष्टुप् छन्दः। इन्द्रो देवता। तत्र हावीन्द्राः-इन्द्रोहाउ इति द्वे सामनी इन्द्रस्यार्कौ। तयोरिन्द्रः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गे. ३६-७)॥ २२॥

(८) यस्येदमा रजोयुजः (५८८) इत्यस्या ऋचः वामदेवः ऋषिः। गायत्री छन्दः। इन्द्रो देवता। तत्र हाउहस्येति अर्कशिरः एकं साम। तस्यार्कः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ३८)॥ २३॥

(९) ततः पार्तीरिति स्तौभिकमर्कग्रीवा इत्येकं साम। ऋगभावान्न छन्दः। साम्नोऽर्कः ऋषिः। देवता च॥ (आ. गा. ३९)॥ २४॥

(१०) उदुत्तमं वरुणपाशम् (५८९) इत्यृचः शुनःशेपः ऋषिः। त्रिष्टुप् छन्दः। वरुणो देवता। तत्र वरुणस्यार्कं एकं साम। तस्य वरुणः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ४०)॥ २५॥

(११) इन्द्रं नरो नेमधिता हवन्ते (३१८) इत्यृचो वसिष्ठः ऋषिः। त्रिष्टुप् छन्दः। अग्निर्देवता। तत्र [इय होइ इन्द्रन्नरो-उवहोइ इन्द्रन्नरो इति द्वे सामनी अर्कपुष्पे। तयोः प्रजापतिः ऋषिः। त्रिष्टुप् छन्दः। इन्द्रो देवता॥ (आ. गा. ४१-२)॥ २६॥]

इत्यारण्यकगानेऽर्कपर्वणि तृतीयः खण्डः॥

## चतुर्थः खण्डः

(१) मूर्धानं दिवो अरतिम् (६७) इत्यृचो भरद्वाजः ऋषिः। त्रिष्टुप् छन्दः। अग्निर्देवता। तत्र काज्यदोहम् कहिम् (हुम्?)-द्विदोहम्-कव्योहम्-मूर्धेत्यग्नेर्वैश्वानरस्य त्रीण्याज्यदोहानि सामानि। तेषामग्निर्वैश्वानरः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ४३-५)॥ २७॥

(२) सुरूपकृत्नुमूतये (१६०) इत्यृचः मधुच्छन्दा ऋषिः। गायत्री छन्दः। इन्द्रो देवता। तत्र रैवतऋषभं साम। तस्य रुद्रः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ४६)॥ २८॥

(३) पिबा सोममिन्द्र मन्दतु त्वा (३९८) इत्यृचः वसिष्ठः ऋषिः। विराट् छन्दः। इन्द्रो देवता। तत्र काइहीपिबेति वैराजऋषभं साम। तस्य रुद्रः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ४७)॥ २९॥

(४) स्वादोरित्था विषूवतः (४०९) इत्यृचः राहूगणपुत्रो गौतमः ऋषिः। पङ्क्तिः छन्दः। इन्द्रो देवता। तत्र ओं स्वादोरिति ऋषभशाकर एकं साम। तस्य रुद्रः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ४८)॥ ३०॥

(५-६) पुरोजिती वो अन्धसः (५४५) उच्चा ते जातमन्धसः (४६७) इत्यृचोः श्यावाश्वः अमहीयुः ऋषी। अनुष्टुप्गायत्र्यौ छन्दसी।

10. My BL. Om. मूर्धानं......तत्र

24. MyBL. आमहीयुः for अमहीयुः; MyBLS. ऋषिः for ऋषी:

उभयोः पवमानसोमो देवता। तयोः **एवुपुरः - उच्चेति** इन्द्रस्य वा अतीषङ्ग एकं साम। तस्य इन्द्रः रुद्रो वा ऋषिः। ऋग्वच्छन्दोदेवते ॥ (आ. गा. ४९) ॥ ३१ ॥

(७-८) **असर्जि वक्वा** (५४३) **असाव्यंशुः** (४७३) इत्यृचोर्द्वयोः कश्यपजमदग्नी ऋषी। त्रिष्टुब्गायत्र्यौ छन्दसी। उभयोरपि पवमानसोमो देवता। तयोः [ए]आसाजित्र–आसाव्यंशुरिति इन्द्रस्य वसोर्वा एकं साम। तयोरिन्द्रो वसवो वा ऋषिः। ऋग्वच्छन्दोदेवते ॥ (आ. गा. ५०) ॥ ३२ ॥

(९-१०) **अभी नो वाजसातमम्** (५४९) **तरत्स मन्दी धावति** (५००) इति द्वयोः ऋचोः ऋजिश्वाम्बरीषश्च आद्याया ऋषी। द्वितीयाया अवत्सारः ऋषिः। अनुष्टुब्गायत्र्यौ छन्दसी। उभयोरपि पवमानसोमो देवता। तयोर**भितरएकारेणे**ति इन्द्रस्य पर्जन्यस्य वा अतीषङ्ग एकं साम। इन्द्रः पर्जन्यो वा ऋषिः। ऋग्वच्छन्दोदेवते ॥ (आ. गा. ५१) ॥ ३३ ॥

(११) **धर्ता दिवः पवते** (५५८) इत्यृचः कविः ऋषिः। जगती छन्दः। सोमो देवता। तत्र प्राजापत्याश्चत्वारः पदस्तोमाः। **हाहहोवा-कहोवा-औहोहोवा-आओहोवा-धर्ते**ति चत्वारि सामानि। तेषां प्रजापतिः ऋषिः। ऋग्वच्छन्दोदेवते ॥ (आ. गा. ५२-५) ॥ ३४ ॥

**इत्यारण्यकगाने अर्कपर्वणि चतुर्थः खण्डः ॥ ४ ॥**

---

## पञ्चमः खण्डः

(१) **चर्षणी धृतम्** (३७४) इत्यृचः विश्वामित्रः ऋषिः। जगती छन्दः। इन्द्रो देवता। तत्र संसर्पाणि सर्पसामानि वा त्रीणि सामानि। **अभाइ-अभिप्र-खचर्षणी**ति त्रीणि संसर्पाणि सर्पसामानि। तेषां सर्पा ऋषयः। अग्निपृथिवीवायवो वा ऋषयः। ऋग्वच्छन्दोदेवते ॥ (आ. गा. ५६-८) ॥ ३७ ॥

22. S. वचर्षणी° for खचर्षणी°
23. MyBL. Om. वा

(२) तवेदिन्द्रावमं वसु (२७०) इत्यृचः वसिष्ठः ऋषिः। बृहती छन्दः। इन्द्रो देवता। तत्र ख सुवः- सुवस् तवेति द्वे सर्पसामनी। अन्तरिक्षादित्ययोर्वा। ऋग्वच्छन्दोदेवते ॥ (आ. ग. ५९-६०) ॥ ३६ ॥

(३) अभि प्रियाणि पवते (५५४) इत्यृचः कविः ऋषिः। जगती छन्दः। सोमो देवता। तत्र सृपायप्रसृपा अभि प्रीति संसर्पं सर्पसाम वा एकं साम। तस्य सर्पः यौर्वा ऋषिः। ऋग्वच्छन्दोदेवते ॥ (आ. गा. ६१) ॥ ३७ ॥

(४) त्वया वयं पवमानेन सोम (५९०) इत्यृचः गृत्समदः ऋषिः। त्रिष्टुप् छन्दः। सोमो देवता। तत्र सृपायप्रसृपा त्वयेति द्वे सर्पसामनी। तयोः सर्पाः आपः समुद्रो वा ऋषिः। ऋग्वच्छन्दोदेवते ॥ (आ. गा. ६२३) ॥ ३८ ॥

(५) स्वादोरित्था (४०९) इत्यृचः राहूगणपुत्रो गौतमः ऋषिः। पङ्क्तिश्छन्दः। इन्द्रो देवता। स्वादोरित्थेति द्वे सर्पसामनी। माण्डवे वा। तयोः सर्पाः मण्डुर्जामदग्न्यो वा ऋषिः। ऋग्वच्छन्दोदेवते ॥ (आ. गा. ६४-५) ॥ ३९ ॥

इत्यारण्यकगाने अर्कपर्वणि पञ्चमः खण्डः

## षष्ठः खण्डः

(१) त्वमिन्द्र प्र तूर्तिषु (२११) इत्यृचो नृमेधा ऋषिः। बृहती छन्दः। इन्द्रो देवता। तत्र औहोइत्वमिन्द्रेति त्रिषन्धि इत्येकं साम।

2. MyBL. संसर्प° for सर्प°;
3. MyBL. °नित्ययोर्वा for °दित्ययोर्वा.
10. BMyL. अप्समुद्रो for आपः समुद्रो
12. BMyL. राहूण°, S. रहुगण° for राहूगण°.
13. BMyL. स्वादोरेद्वेति, S. स्वादोरे ओ द्वे इति for स्वादोरित्थेति.

त्रिषाम वा एकं साम। त्रयाणां रथन्तरबृहद्वामदेव्यानाम् अत्र संधानात् त्रिषामेत्यन्वर्थसंज्ञा। तस्य प्रजापतिः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ६६)॥४०॥

(२) बण्महाँ असि (२७६) इत्यस्याः ऋचः जमदग्निः ऋषिः। बृहती छन्दः। सूर्यो देवता। तत्र एकारेण बण्महा२असीति यज्ञसारथी-त्येकं साम। तस्य प्रजापतिः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ६७)॥४१॥

(३) इमं वृषणम् (५९१) इत्येकपदा ऋक्। तस्याः वामदेवः ऋषिः। एकपदा त्रिष्टुप् छन्दः। विश्वेदेवा देवता। तत्र इमा ओवेति वृषाख्यमेकं साम। तस्य प्रजापतिः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ६८)॥४२॥

(४) ततः य एक इद्विदयते (३८९) इत्यृचः गौतमः ऋषिः। उष्णिक् छन्दः। इन्द्रो देवता। तत्र हाहिं य एक इति एकवृषाख्यं साम। तस्य प्रजापतिः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ६९)॥४३॥

(५) ततो यो न इदमिदम् (४००) इत्यृचः सौभरिः ऋषिः। ककुप् छन्दः। इन्द्रो देवता। तत्र होवा हाइ योनः इति विद्रथाख्यं साम। तस्य प्रजापतिः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ७०)॥४४॥

(६) ततः अभ्रातृव्यो अना त्वम् (३९९) इत्यृचः सौभरिः ऋषिः। ककुप् छन्दः। इन्द्रो देवता। तत्र कहुवे इत्यभ्रातृव्याख्यमेकं साम। तस्य प्रजापतिः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ७१)॥४५॥

---

6. S. °सारथ्येकं for °सारथीत्येकं
8. BMyL. इत्यकं° for इत्येक°.
10. BMyL. वृषेति for वृषाख्यम्.
13. Sm. हाहुम् for हाहिम्.

(७) ततः रेवतीर्नः सधमाद (१५३) इत्यृचः शुनःशेपः ऋषिः। गायत्री छन्दः। इन्द्रो देवता। तत्र हाउरेवा-रावतेति द्वे सामनी रैवते। तयोः प्रजापतिः ऋषिः। ऋग्वच्छन्दोदेवते ॥ (आ. गा. ७२-३)॥ ४६ ॥

(८-१०) उच्चा ते जातमन्धसः (४६७) स न इन्द्राय यज्यवे (५९२) एना विश्वान्यर्य आ (५९३) इत्येकं तृचम्। तस्यामहीयुः ऋषिः। गायत्री छन्दः। पवमानसोमो देवता। तत्र एऊचेति एकं शाकरवर्णाख्यं साम। तस्य शकरवर्णः ऋषिः। ऋग्वच्छन्दोदेवते ॥ (आ. गा. ७४) ॥४७॥

(११) अया रुचा हरिण्या (४६३) इत्यृचः परुच्छेपः ऋषिः। अत्यष्टिश्छन्दः। पवमानसोमो देवता। तत्र एआया इति नित्यवत्साख्यम् एकं साम। तस्य प्रजापतिः ऋषिः। ऋग्वच्छन्दोदेवते ॥ (आ. गा. ७५) ॥ ४८ ॥

ततः (१२) अभि त्वा शूर नोनुमः (२३३) इत्यृचः वसिष्ठः ऋषिः। बृहती छन्दः। इन्द्रो देवता। तत्र अभित्वाशूरनोनुमोवेत्येकं रथन्तराख्यं साम। तस्य वसिष्ठः ऋषिः। ऋग्वच्छन्दोदेवते ॥ (आ. गा. ७६) ॥ ४९ ॥

(१३) त्वामिद्धि हवामहे (२३४) इत्यृचः भरद्वाजः ऋषिः। बृहती छन्दः। इन्द्रो देवता। तत्र अयंवायाउत्वामिद्धाइ इति सप्तहाख्यमेकं साम। तस्य जमदग्निः ऋषिः। ऋग्वच्छन्दोदेवते ॥ (आ. गा. ७७) ॥ ५० ॥

इत्यारण्यकगाने अर्कपर्वणि षष्ठः खण्डः ॥ ६ ॥

---

1. BMyL. रेवतीर्णः for रेवतीर्नः

2. BMyL. रैवत्ये for रैवते.

## सप्तमः खण्डः

ततः (१-२) आक्रन्दय कुरु घोषम् इत्येका ऋक् । **प्रयच्चक्रमराण** इत्यन्या । [इति] अतिरहस्ये द्वे ऋचौ । तत्र आद्यायास्त्रिष्टुप् छन्दः । अनुष्टुबितरा । आद्यायाः शर्वोऽग्निर्वा देवता । द्वितीयायाश्च । तयोः पञ्चपविमन्ति महासामानि । अन्यायाः (अनयोः ? ) पदगीतमेकं साम । तस्य शर्वः ऋषिः । अग्निर्वा । प्रथमायामृचि **आक्रन्दायोवेति** प्रगीतमेकं महासाम । अग्नेर्हरो वा । तस्य रुद्रः ऋषिः । अग्निर्वा । देवता च । ततः **प्रयच्चक्रमिति** द्वितीयायामृचि काम्-अभ्याभूः-कक्षुरो—प्रयच्चक्रमिति त्रीणि महासामानि । आद्ये आग्नेर्हरसी वा द्वे सामनी । [द्वितीयक्षुरहरसी वा द्वे सामनी] । तृतीयसामनी मृत्योर्हर[सी] इति वा । [एवं] नामानि । प्रथमस्य शर्वः ऋषिः । द्वितीयतृतीययोः रुद्रः ऋषिः । क्षुरो वा । तृतीयस्य मृत्युः शर्वो वा । देवता च ॥ (आ. गा. ७८-८३) ॥ ५१ ॥

(३) **अभि त्वा शूर नोनुमः** (२३३) इत्यृचः वसिष्ठः ऋषिः । बृहती छन्दः । इन्द्रो देवता । तत्र कवयोर-(अ ? )भित्वेति लोकानां शान्त्याख्यमेकं साम । तस्य प्रजापतिः ऋषिः । ऋग्वच्छन्दोदेवते ॥ (आ. गा. ८४) ॥ ५२ ॥

(४) **कया नश्चित्र आ भुव** (१६९) इत्यृचः वामदेवः ऋषिः । गायत्री छन्दः । इन्द्रो देवता । तत्र **होवाहाकयान** इति पञ्चनिधनं वामदेव्यम् एकं साम । तस्य वामदेवः ऋषिः । ऋग्वच्छन्दोदेवते ॥ (आ. गा. ८५) ॥ ५३ ॥

---

3. BMyL. om. ऋचौ ; SL. ऋचे for ऋचौ ; MyBLS अनुष्टुभि (S°भी°) तरा for अनुष्टुबितरा.

5. S. after महासामानि adds प्रथमायाः पदगीतमेकं साम ; अन्यायाः See CN.

10. MyBLS. °र्हरसंज्ञे for °र्हरसी see CN.; MyBL. रुद्रः for शर्वः

11. BMyL. प्रथमद्वितीययोः for द्वितीयतृतीययोः ; MyBL. Om. रुद्रः ऋषिः.

(५) पिबा सोममिन्द्र (२९८) इत्यृचः वसिष्ठः ऋषिः। त्रिपदा विराड् छन्दः। इन्द्रो देवता। तत्र होइयापिबेति वैराजमेकं साम। तस्य इन्द्रः ऋषिः। वसिष्ठो वा। ऋग्वच्छन्दोदेवते॥ (आ. गा. ८६)॥ ५४॥

(६) अग्न आयाहि वीतये (१) इत्यृचः भरद्वाजः ऋषिः। गायत्री छन्दः। अग्निर्देवता। तत्र कप्रियहोइ अग्न आयाहि इत्यग्नेः प्रियमेकं साम। तस्याग्निः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ८७)॥ ५५॥

(७) कया नश्चित्र आ भुवत् (१६९) इत्यृचः पूर्ववदृषिच्छन्दोदेवताः। तत्र वीहा[यवाइ]कयान इत्येकं सर्पसाम। कल्माषं वा। तस्य सर्पाः ऋषयः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ८८)॥ ५६॥

(८) अहमस्मि प्रथमजा (५९४) इत्येका ऋक्। त्रिष्टुप् छन्दः। अन्नाभिमानिनी देवता। तत्र कसेतूंस्तर अहमस्मीति सेतुषामैकम्। पुरुषगतिर्वा। विशोकं वा। तस्य पुरुषः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. ८९)॥ ५७॥

इत्यारण्यकगाने अर्कपर्वणि सप्तमः खण्डः॥ ६४॥
अर्कपर्व समाप्तम्॥

---

## इन्द्रपर्व

### प्रथमः खण्डः

तत्र इन्द्रे सामनी एकार्थेये। (१) इन्द्रं नरो न (३१८) इत्यृचः वसिष्ठः ऋषिः। त्रिष्टुप् छन्दः। इन्द्रो देवता। अत्राष्टौ इन्द्रसामानि। कप्राणमायुः-कउत् बलमानोहियेति वसिष्ठस्य प्राणापानौ द्वे सामनी। तयोर्वसिष्ठ ऋषिः। क एन्यौ काहो एन्यौ इति इन्द्रस्यैन्यौ द्वे सामनी।

---

14. BMyLS. इत्यारण्यके प्रथमोऽनुवाकः। प्रथमं पर्व समाप्तम्। for इत्यारण्यकगाने....समाप्तम्.

16. MyB अथ इन्द्रपर्व, SL. अथ इन्द्रसंज्ञके पर्वे for इन्द्रपर्व

19. MyBL. कौत् for क उत्

तयोरिन्द्रः ऋषिः । कहम्–कइहाहम् इति व्रतपक्षौ द्वे सामनी। तयोरिन्द्राणी ऋषिः । हावीन्द्राम्-उवाओवा·इति उल्बजरायुणी द्वे सामनी । तयोरिन्द्राणी ऋषिः । तेषामृग्वच्छन्दोदेवते ॥ (आ. गा. ९०-७) ॥ ५८ ॥

(२) **उप त्वा जामयो गिरः** (१२) इत्यृचः । भार्गवः ऋषिः । गायत्री छन्दः । अग्निर्देवता । तत्र होवाइ–ओवा–उपत्वाजामयोगिर इति उद्भिद्वलभिदौ द्वे सामनी । तयोर्बृहस्पतिः ऋषिः । इन्द्रो वा । उद्भिदः ऋग्वच्छन्दोदेवते ॥ (आ. गा. ९८-९) ॥ ५९ ॥

इत्यारण्यकगाने द्वन्द्वपर्वणि प्रथमः खण्डः ॥

---

## द्वितीयः खण्डः

(१) **बृहदिन्द्राय गायत** (२५८) इत्यृचः नृमेधपुरुमेधावृषी । बृहती छन्दः । इन्द्रो देवता । तत्र **हाउवामयत् बृहदिति** भर्गाख्यमेकं साम ।

(२) **तवेदिन्द्रावमं वसु** (२७०) इत्यृचः वसिष्ठः ऋषिः । तत्र **कयशोतवेति** यशः साम ॥ तयोः प्रजापतिः ऋषिः । भर्गयशसी द्वे सामनी । तयोर्बृहती छन्दः । इन्द्रो देवता ॥ (आ. गा. १००-१) ॥ ६०-१ ॥

(३) **कायमानो वना त्वम्** (५३) इत्यस्या ऋचः विश्वामित्रः ऋषिः । बृहती छन्दः । वैद्युतोऽग्निर्देवता । तत्र **कायमानो-औहोवेति** द्वे यामे सामनी । तयोर्यमः ऋषिः । ऋग्वच्छन्दोदेवते ॥ (आ. गा. १०२-३) ॥ ६२ ॥

(४) **प्र सोम देववीतये** (५१४) इत्यृचः कश्यपाद्यः सप्त ऋषयः । बृहती छन्दः । पवमानसोमो देवता । तत्र **कप्रसोम-औहोवेति** घर्मतनू द्वे सामनी । तयोर्घर्मः ऋषिः । ऋग्वच्छन्दोदेवते ॥ (आ. गा. १०४-५) ॥ ६३ ॥

---

19. BMyL, °तन्वे for °तनू

(५) अयं पूषा रयिर्भगः (५४६) इत्यृचः नहुषो मानवः ऋषिः। अनुष्टुप् छन्दः। पवमानसोमो देवता। तत्र हावयं पूषेति प्रथमद्वितीये। ए अयं पूषेति तृतीयम्। इति त्रीणि सामानि। तेषां प्रजापतिः ऋषिः। ऋग्वच्छन्दोदेवते॥ (आ. गा. १०६-८)॥ ६४॥

(६) त्वमेतदधारयः (५९५) इत्यृचः श्रुतकक्षः ऋषिः। तत्र हाउत्वमेतात्-त्वमेतद्धोहाइ-आइत्वमेततात् इति त्रीणि सामानि वर्षाहराणि। त्रयाणां वृषाहरिः ऋषिः। गायत्री छन्दः। इन्द्रो देवता॥ (आ. गा. १०९-१११)॥ ६५॥

इत्यारण्यकगाने द्वन्द्वपर्वणि द्वितीयः खण्डः॥ २॥

## तृतीयः खण्डः

(१) यच्छक्रासि परावति (२६४) इत्यृचः रेभः ऋषिः। तत्र हाउयच्छक्रासी-इयइयेति श्रौते सामनी। तयोः श्रुतः ऋषिः। बृहती छन्दः। इन्द्रो देवता॥ (आ. गा. ११२-३)॥ ६६॥

(२) अभी नो वाजसातमम् (५४९) इत्यृचः ऋजिश्वाम्बरीषश्च ऋषिः। तत्र आ भीनव-अभीनव इति तास्पन्द्रे द्वे सामनी। तयोः प्रजापतिः ऋषिः। अनुष्टुप् छन्दः। पवमानसोमो देवता॥ (आ. गा. ११४-५)॥ ६७॥

(३) यदिन्द्र शासो अव्रतम् (२९८) इत्यृचः वामदेवः ऋषिः। तत्र यदिन्द्रशासोअव्रातम्—यादीन्द्रइति तौरश्रवसे द्वे सामनी। तयोस्तुरश्रवाः ऋषिः। बृहती छन्दः। इन्द्रो देवता॥ (आ. गा. ११६-७) ॥ ६८॥

---

2. BMyL. द्वितीयमृच्छाम् for द्वितीये

18. My BL. यदिन्द्रे for यदिन्द्र...यादीन्द्र

